2013-2014 Research Journal Volume - III (अङ्कः 3)

ISSN No. 2277-7067

Journal of Fundamental & Comparative Research

शोधसंहिता

A Bi-annual Interdisciplinary Research Journal of K.K. Sanskrit University

कालिदास दिन विशेषाङ्कः

Editor in Chief - Dr. Uma Vaidya

KAVIKULAGURU KALIDAS SANSKRIT UNIVERSITY, RAMTEK

विश्वविद्यालयगीतम्

शतशतकोटिशरत्पर्यन्तम्
प्रवहतात् संस्कृतमन्दाकिनी ।।धृ।।

सिन्धु–शुतुद्री–सरस्वतीनाम्
तटे ऋषीणां ध्यानपराणाम्
होमधूमपावितलोकानाम्
अत्रिभृगूणां छन्दोवाणी ।।1।।
प्रवहतात्.......

वाल्मीकिमुनि – व्यासविरचिता
रामकृष्णयोः पावन–गाथा
अखण्डदीपो भगवद्गीता
कर्मयोगसंदेशवाहिनी ।।2।।
प्रवहतात्....

राष्ट्रैक्यस्य च महती स्फूर्तिः
विना संस्कतं नैव संस्कृतिः
पुष्टिं तुष्टिं समावहन्ती
इह परत्र कल्याणकारिणी ।।3।।
प्रवहतात् ......

रचयिता – महाकवि : डॉ. श्री. ग. बा. पळसुले

2013-2014 Volume - III

Research Journal
ISSN No. 2277-7067

Journal of Fundamental & Comparative Research

शोधसंहिता

A Bi-annual Interdisciplinary Research Journal of
K.K. Sanskrit University

कालिदास
दिनस्य
विशेषाङ्कः

- Editor in Chief -
Dr. Uma Vaidya
Hon'ble Vice Chancellor

- General Editor -
Dr. Madhusudan Penna

**KAVIKULAGURU KALIDAS SANSKRIT UNIVERSITY,
RAMTEK**

शोधसंहिता

A Bi-annual Interdisciplinary Research Journal of KKSU
Journal of Fundamental & Comparative Research

कालिदासदिनस्य विशेषाङ्कः

Editor in Chief : **Dr. Uma Vaidya**
Hon'ble Vice Chancellor

General Editor : **Dr. Madhusudan Penna**

Published by : **Dr. Aravind Joshi**, Registrar

Editorial Board
Dr. Nanda Puri **Dr. C.G.Vijaykumar** **Dr. Lalita Chandratre**
Dr. Krishnakumar Pandey **Dr. Deepak Kapde** (Secretary)

The Editor in Chief, General Editor & the Editorial Board will not be responsible for the thoughts, ideas expressed by the authors of the articles. The author will be solely responsible for his ideas and thoughts. Hence, in case of controversy, the Editor in Chief, General Editor and the Editorial Board should not be made the party.

Kavikulaguru Kalidas Sanskrit University, Ramtek
Administrative Building, Mouda Road,
Ramtek, Dist. Nagpur (Maharashtra) India.
Email - unikalidas@yahoo.com www.sanskrituni.net.in

संपादकीयम्

कालिदासगिरां सारं माधुर्यं वेदितुं क्षमः ।
स्वयं हि कालिदासः स्यात् को वाऽन्यः पृथिवीतले ।।

कविकुलगुरोः कालिदासस्य महाकवेः कवनगरिमाणं भावमहिमानं लोकव्यवहारकौशलं निसर्गचित्रणपाटवञ्च स्वादं स्वादं प्रमुमोदीति सहृदयहृदयम् । तदीयकृतिभाण्डागारे निक्षिप्तं भारतदेशस्वरूपं शाश्वतं सत् पठितृमनांसि प्रह्लादयति । तदीयसाहित्यं रमणीयतयम् । सहस्रे वर्षाणां व्यतीतेऽपि न जामिताऽस्ति तदीयकृत्यास्वादने ।

महाकवि–कालिदासस्य साहित्यं केवलं काव्यशास्त्रपरकमित्येव काचन अलीका रूढिः प्रसृता दृश्यते लोके । परन्तु कालिदासकृतिषु व्याकरण–ज्योतिष–योग–सौन्दर्यसाधन–कृषिशास्त्र–युद्धशास्त्रादिकाः विषयाः संदर्भानुसारं महाकविना महता परिकरेण समुपवर्णिता इति तदीयकाव्याध्ययनेन बुध्यते । अतो महान् विज्ञानकोश एव कालिदासकृतयः ।

एतन्मनसि धृत्वा *'कालिदाससाहित्ये शास्त्रशलाकाः'* इति विषयमवलंब्य संस्कृतविश्वविद्यालयेनाऽनेन वर्षेऽस्मिन् काचन संगोष्ठी आयोजिता यत्र बहवो विद्वांसो विदुष्यश्च कालिदासकृतिगतं विज्ञानमाश्रित्य कृतं स्वसंशोधनं प्रास्तुवन् । तथैव *अभिजातसंस्कृतसाहित्ये शास्त्रशलाकाः* इतिविषयमवलम्ब्यापि काचिद् संगोष्ठी आयोजिताऽभवत् । सगोष्ठीद्वयेऽपि आवश्यकविषयेषु चर्चा विहिता संशोधकैः । अयमेकः संशोधनदिशि श्लाघनीय उपक्रम इति भावयेऽहम् । अनेन प्राचीनकृतिषु प्रतिबिबितं विज्ञानमपि वयं वेदितुं पारयामः । आधुनिकसमाजस्य कृतेऽपि उपयुक्तान् विषयान् ततो वयं प्राप्तुं शक्नुमः ।

कालिदासदिन–महोत्सवसन्दर्भे आयोजितायां विशिष्टसंगोष्ट्यां विद्वद्भिः समर्पितानां लेखानां सङ्कलनमिदं 'विशेषाङ्क' रूपेण भवतां पुरो निधीयते । इतोऽपि काचित् प्रेरणा नूनमेव प्राप्यत इति मे विश्वासः । शुभं भवतु ।

कुलगुरुः

अनुक्रमणिका

1.	बीजभाषणम्	डॉ. उमा वैद्य	1–12
2.	कालिदासकृतिषु वृत्तविज्ञानम्	डॉ. मधुसूदन पेन्ना	13–23
3.	कालिदासस्य साहित्ये काव्यशास्त्रीयविचाराः	डॉ. नंदा पुरी	24–34
4.	वैदिकचिन्तनम् कालिदाससाहित्ये	डॉ. सी. जी. विजयकुमार	35–44
5.	त्रिस्कन्धज्योतिर्विद्–महाकवि कालिदासः	डॉ. कृष्णकुमार पाण्डेय	45–56
6.	कालिदाससाहित्ये शिक्षाव्यवस्था	डॉ. हृषीकेश दलाई	57–66
7.	कालिदासस्य साहित्ये प्रसाधनम् अलंकरणं च	डॉ. स्मिता होटे	67–77
8.	मृच्छकटिके समाजशास्त्रदर्शनं रुद्‌यस्तथाचारविशेषाः।	डॉ. परिणीता देशपांडे	78–87
9.	संस्कृतवाङ्मये–विशेषतः महाकाव्यपञ्चके–युद्धशास्त्रम्	प्रा. डॉ. मंजूषा गोखले	88–100
10.	कालिदासस्य नीतिचिन्तनम्	डॉ. लीना रस्तोगी	101–107

अध्यक्षीयं तथा च बीजभाषणम्

डॉ. उमा वैद्य

सरस्वतीं प्रणम्यादौ कालिदासं तथोत्तरम्।
साहित्याभ्यासकान् सर्वान् प्रार्थये विनयान्विता।।

प्रदर्शनं च साहित्ये शास्त्राणां कारितं यथा।
दासेन कालिमातुर्वै सानन्दं परिप्रेक्ष्यताम्।।

काम–योग–कृष्यादीन् राजनीतिं च शाश्वतीम्।
व्युत्पत्ति–काव्य–शास्त्रादीन् सेवन्तां भो यथारुचि।।

दृढं प्रीतास्मि सर्वेषाम् उत्साहानन्दवर्धनैः।
स्वागतं व्याहराम्यत्र शब्दपुष्पैः सुगन्धिभिः।।

स्वीक्रियतां स्वागतं, सुस्वागतम्,

कालिदासविषयकं संशोधनं, तत् काव्यविषयकं वा भवतु उत शास्त्रविषयकम् उभयत्रापि कालिदासगिरः एव महत्त्वं वरीवर्ति। कविकुलगुरोः कालिदासस्य सप्तरचनाभिः निर्दिष्टं तस्य जीवनतत्त्वज्ञानं लोकविलक्षणं, श्रुतिमूलकं तथा श्रेयःप्रेयसोः अनुपमसङ्गम एव । का नाम श्रुतिरिति पृष्टे अवर्णनीयवर्णनस्य धाष्ट्र्यं भवेत्। तथापि एवं वक्तुं शक्यं यत् श्रुतिः नाम परमात्मनः निश्वासरूपा, परमपवित्रा, नित्यशुद्धबुद्धरूपा, उषःकालस्य तुषारबिन्दुरिव स्पष्टा पारदर्शिपदावली। कुतः समागता, क्व गमिष्यति इति नावबुध्यते । तथापि सद्यःस्थितावपि संतप्तानां जनानां शीतलतां प्रददाति । एवंविधश्रुतेः प्रणीतायाः दशसहस्रवर्षेभ्योऽपि प्राचीनायाः भारतीयजीवनपद्धतेः सार्थाभिमानिनः नैके साहित्यविद्वांसः पौनःपुन्येन स्वकृतिषु श्रुतिमाहात्म्यं वर्णयामासुः। मूल्यानि वैशिष्ट्यानि च विशदीचक्रुः। कालिदासस्तु विषयेऽस्मिन् अग्रगण्यः।

''श्रुतिपथं दर्शयिताऽत्र दृश्यते, न कालिदासादपरः कवीश्वरः'' कविकुलभूषणेन कालिदासेन वैदिकसनातनधर्मध्वजो विश्वरूपी आकाशे उत्तुङ्गं प्रतिष्ठापितः । वस्तुतः धर्मस्य तत्त्वं निहितं गुहायाम् इति उच्यते किन्तु कालिदाससदृशः कविः तासां गुहानां द्वाराणि स्वीयवाण्या समुद्घाट्य लोकवर्णनानिपुणेन लेखनकौशल्येन धर्मं समाजाभिमुखं करोति । साहित्ये केवलं श्रुतिरमणीया पदावली अथवा राज्ञां प्रेमवर्णनानि एवं गीतानि इति न अपि तु मनोरञ्जनेन सह 'ग्रामं गच्छतः तृणस्पर्श इव' विविधशास्त्राण्यपि विवेचितानि । शतकानुशतकमस्माभिः भासकालिदासभवभूतीनामुत्तमोत्तमकृतीनां काव्यशास्त्र–विशेषतया अध्ययनं कृतं यच्च आवश्यकमपि आसीत्। किन्तु सद्यः शास्त्रीयाध्ययनस्य महत्त्वमधिकतया भासते। तस्मात् जनाः यद् वाञ्छन्ति तदनुगुणं यदि अस्माभिः ज्ञानं प्रदीयते चेत् संस्कृते विद्यमानं शास्त्रीयं ज्ञानं सर्वेषां सम्मुखमागमिष्यति। येन संस्कृतविषयकः जनानुरागः अभिमानश्च वृद्धिमेष्यति। विविधशास्त्राणामध्ययनमिदं न केवलं वेदवेदाङ्गेषु संहितासु वा सीमितं विद्यते अपि तु काव्यवाङ्मयेष्वपि शास्त्रप्रतिबिम्बानि वर्णितानि दृश्यन्ते । किं बहुना संस्कृतकवयः शास्त्रवेत्तारोऽपि आसन् इति वक्तुं शक्यते । तैः न कोऽपि शोधः प्रस्तुतः स्यात् किन्तु कृषिशास्त्रम्, उल्काशास्त्रम् इत्यादीनां ज्ञानं सम्यक् आसीत्। कालिदासोऽपि एवमेव शास्त्रकविः आसीत् । अत एव अस्यां परिषदि ''कालिदाससाहित्ये शास्त्रशलाकाः'' इति विषयमधिकृत्य एकादशशास्त्राणां चर्चा भविष्यति । वैदिकविचारः व्याकरणं तथा व्युत्पत्तिशास्त्रं, ज्योतिषशास्त्रम्, कृषिः, भूगोलः, पर्यावरणशास्त्रं, शिक्षाशास्त्रं, काव्यशास्त्रं, योगशास्त्रं, राज्यशास्त्रं, नीतिशास्त्रं, प्रायोगिककलाः, प्रसाधनं तथा अलङ्करणशास्त्रम्।

वैदिकविचाराः स्मारयन्ति यज्ञयागादीनां पवित्रां संस्कृतिम् । श्रुत्युक्तधर्मस्येदं व्यवच्छेदकं लक्षणमेव । कालिदासस्यापि विषयोऽयम् अतिप्रिय एव । रघुवंशे वा मेघदूते वा शाकुन्तले वा सर्वत्र यजमानानां यूपस्तम्भचिह्नानि, समित्कुशादिहरणं, तपस्विजनः, पर्णशालाद्वाररोधिणः ऋषिपत्नीनां पुत्रतुल्याः मृगगणाश्च दृश्यन्ते । तथैव वातेरिताहुतिगन्धयुक्तधूमैः साश्रुनेत्राः मुनिगणाश्च

इतस्ततः सञ्चरन्तः दृश्यन्ते । वेदकालीनाश्रमस्य सुन्दरं शब्दचित्रं महाकविना कालिदासेन आलेखितमस्ति । शकुन्तलायाः प्रतिकूलं दैवं शमयितुं सोमतीर्थं गतः कण्वस्य भवतु उत पुत्रकामेष्टिं यजतः दशरथस्य वा भवतु यज्ञेभ्यः फलसिद्धिस्तु सुनिश्चिता आसीत् । स्वर्गकामो यजेत इत्यस्य प्रतिरूपमेव ननु। कालिदासस्य नायकः रघुः तथा धर्मनिष्ठः धर्मधृष्टः यत् साक्षात् इन्द्रमपि सधैर्यं ब्रूते यत् – ''त्रैलोक्यनियामकेन त्वया अतीन्द्रियार्थदर्शिना वस्तुतः मखद्विषः नियाम्याः । स त्वं यदि धर्मचारिणां कर्मसु नाम क्रतुषु अन्तरायो भवसि चेत् तर्हि विधिरेव च्युतः इति मन्ये । अनेन त्वया धर्मबाधकेन सत्कर्मकथा एव अस्तमीयात्। वस्तुतः कठोपनिषदि 'श्रेयो हि धीरः अभिप्रेयसो वृणीते, प्रेयो मन्दो योगक्षेमाद् वृणीते' इति उक्तं तथापि कालिदासस्य नायकः, नायिका तथा प्रजाश्चापि सविचारं विषयममुं रक्षन्ति। वस्तुतः एते द्वे विपरीते विषूची तमः प्रकाशवत् विरुद्धे तयोः समत्वेन मेलनमशक्यं खलु। तथापि कालिदासमार्गदर्शकरूपेण यदा कालिदासेन स्थीयते तदा सर्वमेव सुलभं सुकरं च । वैदिकसंस्कृतेः अपरः अंशः नाम वर्णाश्रमधर्माणां परिपालनम् । कालिदासस्य सर्वे नायकाः वर्णाश्रमधर्मपरिपालकाः आसन्। यतः स्वयं कालिदासः वैदिकानां वरुण इव आसीत्।

कालिदासस्य व्याकरणे तथा व्युत्पत्तिशास्त्रे अनतिसाधारणगतिरासीत्। 'पुराणस्य कवेस्तस्य' इत्यस्मिन् कुमारसम्भवश्लोके (2.10) 'चतुष्टयी शब्दानां प्रवृत्तिरिति' महाभाष्यवाक्यं यथावदवतारितम् । व्याकरणशास्त्रस्य नैकान् विषयान् स उपमाभिः प्रकटयति। कौशलेऽस्मिन् सोऽ द्वितीयः। ''वागर्थाविव सम्पृक्तौ'' इत्यत्र वागर्थयोः सम्पृक्ता, शब्दार्थयोः नित्यसम्बन्धः यः प्रदर्शितः सः 'सिद्धे शब्दार्थसम्बन्धे' इति व्याकरणस्य मूलसिद्धान्ताश्रितः। संस्कृतपाठकेभ्यः वार्त्तिकमिदं ज्ञातं स्यादेव इति न तथापि कालिदासलेखनीप्रकाशात् उपमेयं जगति प्रसिद्धा अभवत् । अस्यामेकस्यामुपमायां शास्त्रत्रयस्य वर्णनं सुन्दरतया अकारि कालिदासेन। यथा पूर्वमुक्तं व्याकरणशास्त्रस्य आधारः स्वीकृतः तदुपरि काव्यशास्त्रस्य उपमारूपेण सुन्दरमलङ्करणम्, तथैव अनयोः शास्त्रयोः परिपाक इव शिवपार्वत्योः अद्वैतं संवर्ण्य दैवतशास्त्रीयसङ्कल्पनाऽपि साधिता। एवं

प्रकारेण Grammar, Poetics and Mythology together सर्वमपि साधितम् । अनुपमं केवलमनुपमेव । तस्येदं व्युत्पत्तिकौशल्यम् अवर्णनीयमेव ।

'उमेति मात्रा तपसो निषिद्धा पश्चादुमाख्यां सुमुखी जगाम' उ – संबोधनम्, मा – निषेधात्मकमव्ययं, मूलतः उभयमपि निरर्थकमक्षरं स्वतन्त्ररूपे । व्याकरणानुसारं तयोः अनुक्रमे संबोधनम् एवमव्ययसंज्ञा प्रदत्ता । एतादृशयोः वस्तुतः पाणिनीयनियमानुगुणं समासः न भवति । यदि समासः कर्तव्य एव भवेत् तर्हि केवलसमासः अथवा आकृतिगणः स्यात् यत्र सर्वसमासविषयकाणाम् अपवादानां स्पष्टीकरणं दीयते परन्तु कालिदासस्य शैली एव भिन्ना । 'अर्थनित्यः परीक्षेत' इति यास्कवचनं पुरस्कृत्य तेन उमा शब्दस्य व्युत्पत्तिः प्रदत्ता । ततः व्याकरणविद्वद्भिरपि रूढ्या स्वीकृतेयं व्युत्पत्तिः प्रमाणत्वेन स्वीकृता । यतो हि उच्यते खलु –

शास्त्राद् रूढिर्बलीयसी' । तथापि तेन रघुः अजः, चन्द्रः, तपनः, क्षत्रियः, शतक्रतुः एतेषां पदानां शास्त्रसम्मता व्युत्पत्तिः प्रदर्शिता एव । वेदाङ्गज्योतिषविषयेऽपि इयमेव कथा । कालिदासः वेदाङ्गज्योतिषस्य तदीयं ज्ञानं नक्षत्रबहुलमाकाश इव बहुलतया तत्र तत्र विकीरयति । जामित्रम्, उच्चसंस्था आदि उपमाभिः तस्य ग्रहज्योतिषज्ञानं ज्ञायते एव । तथैव तस्य नैकाभिः उपमाभिः फलज्योतिषस्य ज्ञानमपि प्रकटीभवति । तारकासुरः धूमकेतुरिव लोकनाशस्य कारणमभूत् (कु. 2.32), शत्रुमभिवर्णनीयः राजा यथा शुक्रयुक्तां दिशं वर्जयति तथैव मदनः नन्दीदृष्टिं वारयित्वा शिवस्य तपोवने प्राविशत् (कु. 3.43), चन्द्रमसः उत्तरफाल्गुनीनक्षत्रेण योगे सति मैत्रमुहूर्ते सौभाग्यवत्यः पुत्रवत्यश्च स्त्रियः पार्वत्याः केशप्रसाधनमकुर्वन् (कु. 7.6), मङ्गलः वक्रगत्या पूर्वराशिं समधिगच्छति । तथैव राज्ञी इरावती कदाचित् प्रत्यागच्छेदिति (माल. अंक 3) विधानानि कालिदासस्य फलज्योतिषज्ञानस्य प्रमाणानि एव । यानि एतत् प्रदर्शयन्ति यत् कालिदासः केवलं ग्रन्थाध्ययनेन ज्योतिषमधिगतवान् इति न अपि तु तस्य स्वीयं निरीक्षणमपि आसीत् । 'एष चित्रलेखाद्वितीयार्मुवशीं गृहीता विशाखासमीपगत इव चन्द्रः उपस्थितो राजर्षिः' अत्र सोमवंशीयराजाय पुरवे चन्द्रस्य उपमां प्रदाय तथा

विशाखानक्षत्रस्य तारकापुञ्जद्वयमिव (उर्वशी तथा चित्रलेखा) वर्णयित्वा इदं सर्वमपि तस्य नित्यनिरीक्षणे आसीदिति ज्ञायते । (विक्र. 1) 'किमत्र चित्रं यदि विशाखे शशाङ्कलेखामनुवर्तते' इत्यत्र शकुन्तलां चन्द्रलेखायाः, सखिद्वयं च विशाखे इति उपमां सहजतया प्रदाय सः स्वीयलेखन्या स्वाभाविकग्रहतारानिरीक्षणस्य पाटवं प्रदर्शयति ।

अपरः एकः विषयः तेन सूक्ष्मतया अधीत्य वाचकेभ्यः प्रत्यायितः । स च भूगोलः । कृषि–भूगोल–उल्काशास्त्रम् अथवा पर्यावरणशास्त्रस्य प्रत्ययः सर्वत्र दृश्यते । 'त्वय्यायत्तं कृषिफलमिति' इति कथयन् कालिदासः भारतस्य कृषिप्राधान्यमुल्लिखति चेत् ऋतुसंहारे 'परिणतबहुशालिव्याकुलग्रामसीमा' इति वदन् शाली–तिल–पुष्पादीनां वर्णनं विधत्ते । यथा मराठीभाषायामुच्यते –

"नवीन पल्लव फुटता राने कशी शोभिवन्त
पिकल्या साळी, लोध्र बहरता फले आसमन्त ।।"

इत्येवं प्रत्ययकारिवर्णनं कालिदासः करोति ।

'धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः' इत्यनेन मेघनिर्मितेः पराशरकृतां कृषिशास्त्रस्य प्रक्रियामेव व्यनक्ति चेत् मेघप्रकारेषु पुष्करावर्तकस्य मेघस्य 'कल्पान्तकालजलद' रूपं व्याख्याय तव जन्म तादृशे शास्त्रसम्मते महनीये वंशे जातमिति उक्त्वा स्वकीयं मेघविषयज्ञानं प्रकाशयति । एतादृशाः नैके सन्दर्भाः समुपलभ्यन्ते एव तथापि तस्य भौगोलिकज्ञानस्य आयतिः विशाला एव । रामगिरितः अलकापर्यन्तं विद्यमानस्य मार्गस्य अतिसूक्ष्मं ज्ञानं तस्य आसीत् । गन्तव्यस्थानं कुबेरस्य अलका, प्रस्थानबिन्दुः रामटेकस्य रामगिरिः, मध्ये विद्यमानः मार्गः नाम व्याकरणदृष्ट्या गन्तव्योऽध्वा । अथापि 'मार्गं तावत् शृणु' इत्युक्त्वा आम्रकूट–रेवा–विन्ध्यपाद–दशार्ण–विदिशा–वेत्रवती–नीचैःगिरिः – श्रीविशालापुरी उज्जायिनी– चर्मण्वती–दशपुरनगरी–कनखलः–कैलास–मानस–मन्दाकिनी–अलका इत्येवं सुदीर्घः मार्गः यथावत् वर्णितः । अत एव

डॉ. भावे तथा कॅप्टन आनंद बोडसे महोदयेन 'हेलिकॉप्टर' निर्माय तदधः छायाचित्रग्राहकयन्त्राणि संस्थाप्य अयं सम्पूर्णः मार्गः अवलोकितः।

उत्तमाध्ययनं तथा विद्याविनयः नाम नायकानां जीवनस्य एव न अपि तु सम्पूर्णसमाजस्य सुसंस्कृतजीवनस्य आधारशीला एव इति कालिदासमतम्। अत एव 'शैशवेऽभ्यस्तविद्यानाम्' इति रघूणां कृते विशेषणं प्रदत्तम् । 'श्रुतस्य यायादयमन्तमर्भकः' इति रघुप्रार्थनां प्रकटयन् सः वेदविद्याध्ययनस्य महत्त्वमेव ब्रूते । तस्य नायिकाः अपि सुविद्याः । 'किमुत याः प्रतिबोधवत्यः' इति वाक्येन दुष्यन्तः सव्याजं शकुन्तलां बोधयति यत् स्त्रियः अशिक्षितपटवः इति प्राणिमात्रेष्वपि दृश्यते चेत् का कथा सुशिक्षितानाम्! तथैव पार्वतीप्रशंसायामपि सः वदति यत् अध्ययनरता सा उपविष्टे सति गतजन्मनः अधीतविद्याः स्मरति। यथोक्तं – "प्रपेदिरे प्राक्तनजन्मविद्याः" तस्य पौरवजनाः अपि सुशिक्षिताः सुसंस्कृताश्च सन्तः समाजस्य प्रतिनिधित्वं कुर्वन्ति।

पाणिनिमहर्षिणा युजिर्योगे समाधौ च इति युज् धातोः द्वावर्थौ प्रदत्तौ । ययोः वेदेषु योगः नामः सम्बन्धः इति अर्थः दृश्यते चेत् पातञ्जलयोगविवेचने योगशब्दः 'समाधिः' इत्यर्थे प्रयुक्तः दृश्यते । कालिदासः पतञ्जलेरभिमतमर्थमेव स्वीकृत्य योगाधारिता जीवनपद्धतिरेव सर्वश्रेष्ठा इति स्वनायकैः समाजमनस्सु प्रतिष्ठापयन् रघूणां वंशवर्णने 'योगेनान्ते तनुत्यजाम्' इति रघुकुलराजानां सर्वोत्तमा अन्तिममरणावस्था इति वर्णिता चेत् कुमारसम्भवे ध्यानस्थशिवस्य पर्यङ्कबन्धवीरासनस्थोत्तानपाणिद्वयसन्निवेशस्थितिं संवर्ण्य अन्ते 'मनो नवद्वारनिशिद्धवृत्ती' इति अवस्थायां शिवः स्वहृदि स्थितं शिवतत्त्वम् अवालोकयदिति समाधेः परमश्रेष्ठां स्थितिं वर्णितवान् । किन्तु कालिदासः मम कृते किमर्थं प्रियः इत्यस्य कारणं भिन्नमेव । कालिदासस्य योगविषयकं ज्ञानमित्यस्मिन् विषये अपरः शोधनिबन्धः प्रस्तुतः भविष्यति एव तथापि रञ्जकमिदं दृश्यमवलोकयन्तु, योगस्य परमोच्चावस्थाप्राप्तिसमये पुरतः विद्यते प्रियकरं पतिरूपेणावाप्तुम् उत्सुका, सौन्दर्यरतिः, कामविवशा पार्वती । एकतः सर्वश्रेष्ठयोगी चेत् पुरतः विद्यते कामशास्त्रवर्णिता रतिचतुरा कामिनी । मनोवृत्तीनां

शास्त्राणाञ्च कियान्विरोधोऽत्र रञ्जकतया वर्णितः। कालिदासस्य कामशास्त्रप्रवणताविषये तु संशयलेशोऽपि मास्तु। शिवपार्वत्योः समागमवर्णनेन तयोरवमाननं यदभवत् तेन कालिदासप्रतिभा शापभग्ना जाता इति उच्यते । केवलं वाक्शृङ्गारः। परिणामः कश्चेत् वागपि शप्ता! कथांशमिदं त्यजामश्चदेपि कालिदासेन कृतं वात्स्यायनस्य कामसूत्रस्य अध्ययनं निराकर्तुं न शक्यते । कामसूत्रस्य कन्यासंप्रयुक्ताधिकरणे लज्जापरवशयुवतिः प्रियकरेण सह कथं सम्भाषेत ? इत्यस्मिन् विषये वर्णितमस्ति ।

अभिज्ञानशाकुन्तलस्य प्रथमाङ्के एव 'वाचं न मिश्रयति यद्यपि मद्वचोभिः (शा. 1.27) इत्यत्र शकुन्तलाभाषणशैली, अजेन्दुमत्योः प्रेमसंलापः, विक्रमोर्वशीस्थनगरजनान् प्रति उक्तानि वाक्यानि, अथवा अग्निमित्रस्य प्रेमसंबन्धिसहायकाय विदूषकाय इरावत्या दत्तः 'कामतन्त्रसचिवः' इति उपाधिः एतत् सर्वं कालिदासस्य कामशास्त्रज्ञानं प्रकाशयति । विषयेऽस्मिन् ज्ञात्वैव शोधनिबन्धः न स्थापितः। प्रस्तोता अपि निर्दिष्टे 20 निमिषे समापयितुं न शक्नोति, न वा श्रोता अलमिति वक्ष्यति इति । किन्तु अन्ततो गत्वा सर्वोऽपि एषः कामविषयः अनुभवसिद्ध एव। तात्त्विकचर्चया अथवा तर्कशुद्धसिद्धान्तेन न किमपि सेत्स्यति।

योगशास्त्रं भवतु उत कामशास्त्रम् उत्तमाभिव्यक्तेः स्थानं तु कालिदास एव। कविकुलगुरुपदेन भूषितः काव्यशास्त्रपारङ्गतः इति कथने न कोऽपि विशेषः। यथा डी.लिट. पदवीप्राप्तस्य दशमकक्ष्याज्ञानमपि अस्ति इत्येतादृशं कथनं स्यात्। काव्यस्यात्मा ध्वनिरथवा रसः? अनलंकृती सगुणौ दोषरहितौ शब्दार्थौ काव्यं वा? इत्यादिप्रश्नानामुत्तरं कालिदासः स्वीयकाव्यैः प्रतिपादयति। भवन्तु नाम काव्यस्य विभिन्नव्याख्याः। किन्तु अस्य काव्यस्य एक एव प्रकारः उत्तमकाव्यमिति। 'अतिशायिनि व्यङ्ग्ये वाच्याद्' इति एकमेव लक्षणम् । 'स्वयं विधाता तपसः फलानां केनापि कामेन तपश्चचार। अत्र सामान्यपदावली परन्तु कियदर्थगाम्भीर्यम्! अन्यजनानां तपसः फलदाता अयं जनः स्वकीयं कमभिलाषं पूरयितुं तपस्तप्तवान् इति को जानाति? अस्य काव्यस्य अपरः गुणः रसराजशृङ्गारस्य वर्णनानैपुण्यम् । प्रच्छन्नतया भवतु अथवा प्रकाशम् !

शृङ्गारसमये उभयोरपि मनसि विद्यमानाम् उत्कटतां, रतिचातुर्यम्, उभाभ्यामनुभूतञ्च रसपरिपोषञ्च साधु वर्णयति ।अन्येषां सर्वरसानामाविष्कारः एकाङ्गतया भवितुमर्हति। किन्तु शृङ्गाररसे उभयोरपि महत्त्वम् । आरम्भे द्वैतस्य माहात्म्यं किन्तु अन्ते अद्वैते एव रसस्यास्य परमोत्कटता अनुभूयते ।

"पुष्पासवामोदि सुगन्धिवक्त्रो निःश्वासवातैः सुरभीकृताङ्गः।
परस्पराषङ्ग व्यतिरिक्तशायी शेते जनः कामरसानुविद्धः।।"

अत्र काव्यं, रसः तथा तत्त्वज्ञानं समग्रमपि एकत्रितं वर्तते ।अस्य काव्ये शृङ्गारः केवलं मानवीयः न अपि तु वनज्योत्स्ना आम्रवृक्षयोः, 'मृगीमकण्डूयत कृष्णसारः' इत्यत्र मृगयोः, एकस्मात् पुष्पात् मधुपायिनोः द्विरेफयोः यथोक्तं 'मधुद्विरेफः कुसुमैकपात्रे पपौ प्रियां सामनुवर्तमानः" (कु. 3.36) सर्वेषां सः शृङ्गारः विभावादिजन्यः वर्तते । अत एव एषः रससिद्धः कविः। 'उपमा कालिदासस्य' इत्यस्मिन् विषये एकस्मिन् सत्रे निबन्धे चर्चा भविष्यति एव । तथापि अयं स्वामी अर्थान्तरन्यासस्य ।अर्थान्तरन्यासो नाम यत्र जीवनस्य ज्ञानं परिपूर्णतया स्थापितं विद्यते । यत्र रसाय न अवकाशः इति भाति तत्र अयं शब्दालङ्कारमुपयुङ्क्ते ।

"ततो मृगेन्द्रस्य मृगेन्द्रगामी वधाय वध्यस्य शरं शरण्यः ।
जाताभिषङ्गो नृपतिर्निषङ्गात् उद्धर्तुमैच्छत् प्रसभोद्धृतारिः।।"

अस्य अनुप्रासे नादमयता तालश्च श्रूयते । कृतबद्धता तु तादृशी यत् सर्व श्रुतिमाधुर्यम् अनुपमम् । पुनश्च वर्णविपर्ययोः न किं मनागपि स्थानम् । श्रुतिमधुरता, वृत्तबद्धपदावली, कोमलकान्तरवर्णानि एवं कतिगुणाः अस्य काव्यस्य वर्णनीयाः काव्यनिर्मितेः घटकत्रययुक्तः हेतुः (शक्तिर्निपुणतादि) । ननु अस्य समक्षं कृताञ्जलिः स्थित्वा याचते ।अत एव एषः कविकुलस्य गुरुः ।

कालिदासः रामटेकपर्यन्तं कथं सम्प्राप्तः इत्यस्मिन् विषये यदि डॉ. वि. वा. मिराशीमहोदयानां मतमवलम्ब्यते चेत् ज्ञायते यत् कालिदासः राजकार्यविषयकं परामर्शं दातुमागतेषु कश्चन राजपुरुषः आसीदिति । एतेन

तस्य राजकार्यविषयकज्ञानविषये प्रावीण्यं स्पष्टम् अवगम्यते । कौटिल्यस्य अर्थशास्त्रमथवा कामन्दकीयनीतिसारं सः सम्यगालोड्य पीतवान् इति स्पष्टं दृश्यते । तस्य त्रीण्यपि नाटकानि तथा रघुवंशमहाकाव्यं राजकार्यविषय–सम्बद्धमेव। तस्मात् राजकार्यसन्दर्भानाम् उल्लेखः स्वाभाविक एव । तेन प्रतिपादिताः सिद्धान्ताः विशिष्टाः तथा महत्त्वपूर्णाः इति ज्ञायते ।आदर्शराजानां वर्णनावसरे तस्य लेखनी इतोऽपि सरसतामाप्नोति। 'प्रजासुखे सुखं राज्ञः प्रजानां च हिते हितम्' इति कौटिल्यवचनं संस्मृत्यैव सः 'स पिता पितरस्तासां केवलं जन्महेतवः' (1.34) इति आदर्शराजं वर्णयति ।

मन्त्रिभिः सह कृतपरामर्शः गोप्यः भवेदिति राज्यशास्त्रस्य अपरः प्रमुखसिद्धान्तः।अस्यैव प्रतिबिम्बं

"तस्य संवृतमन्त्रस्य गूढाकारेङ्गितस्य च।
फलानुमेयाः प्रारम्भाः प्राक्तना इव।।" (रघु. 1.20)

इति श्लोके दृश्यते।स्मृतिकारः याज्ञवल्क्यः सूचयति यत् मन्त्रमूलं यतो राज्यमतो मन्त्रं सुरक्षितम् । कुर्याद्यथा तन्न विदुः कर्मणामाफलोदयात् ।अनेन ज्ञायते, कालिदासः पदान्यपि स्मृतिभ्य एव स्वीकृतवान् ।आफलोदयकर्मणामिति तेन स्पष्टोक्तम् अन्यथा सर्वप्रकाशकत्वात् फलोदये न्यूनता स्यादिति। कुमारसम्भवे शुक्रनीतेः उल्लेखः स्पष्टतया तेन कृतः (कु. 3.6) । रघुवंशीयराजानां युक्तदण्डत्वं तस्य प्रियविषयः । 'यथापराधदण्डानाम्', 'युक्तदण्डतया' (रघु. 4. 5), 'स्थित्यै दण्डयतो दण्ड्यान्' (रघु. 1.25) इति विशेषणानि कौटिल्यस्य 'तीक्ष्णदण्डः भूतानामुद्वेजनीयो भवति मृदुदण्डः परिभूयते यथार्हदण्डः पूज्यते' इत्यादिपदानां प्रतिबिम्बानि इव दृश्यन्ते । अर्थशास्त्रस्य सप्ताङ्ग–यातव्य–प्रकृति–प्रशमन– मूल–प्रत्यन्त–पार्ष्णि इत्यादिविशिष्टसंज्ञाः सोऽसकृत् उपयुङ्क्ते। तथैव राज्ञां धर्मविजयित्वं, यज्ञरक्षणदायित्वञ्च 'कुतो धर्म–क्रियाविघ्नः सतां रक्षितरि त्वयि' इ. वचनैः प्रकटयति ।आहत्य वक्तुमिदं शक्यते, कालिदासः आदर्शराजस्य तथा नियन्तुर्नेमिवृत्तीनाम् आदर्शप्रजाः सुचारुतया आलेखयति ।

कालिदासस्य नीतिविषयप्राशस्त्यस्य तु कथा एव अनुपमा । आदर्शस्यापि आदर्शमिव साहित्यं सः पुरः उपस्थापयति । चक्रस्य गतिः यथा मार्गं न विजहाति तथा दिलीपस्य प्रजाः नीतिमार्गात् भ्रष्टाः न भवन्ति स्म इत्युक्तम् चेत् कः सन्देहः नायकनायिकानां नीतिमत्तायाः । तथापि अन्ते सोपदिशति, 'नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण' ।

इदानीमवलोकयामः कलाविषये । काव्यानन्दवर्धकाः काश्चन कलाः तस्य सख्यः सन्ति । यथा चित्रकला, नृत्यकला । मालविका उत्तमनर्तिकारूपेण प्रस्तुता । मालविकाग्निमित्रे एकेन प्रसङ्गेन नृत्यप्रयोगः प्रदर्शितः । किन्तु विक्रममोर्वशीयस्य चतुर्थाङ्के नृत्यप्रयेगः सविस्तारं प्रदर्शितः । तत्र वर्णिताः गीतरचनाः । ननु नृत्यार्थमेव रचिताः इति अवलोकने ज्ञायते । आक्षिप्तिका, खण्डधारा, अम्भालिका, चर्चरी, द्विपदिका, एताः नृत्यस्य विभिन्नावस्थाः । तासां निमित्तं समग्रतया तेन एकः अङ्कः स्थापितः । उर्वशी तु अप्सरा एव तस्मात् तस्याः नृत्यप्रयोगस्तु रमणीय एव । चित्रकलायां तु अस्य समेऽपि नायकाः निपुणाः दृश्यन्ते । नायकनायिकाः चित्रलेखने सर्वेऽपि उत्सुकाः दृश्यन्ते । दुष्यन्तः शकुन्तलायाः चित्रं लिखति चेत् अग्निमित्रः मालविकायाः । तत्र चित्रनिर्माणाय प्रत्यक्षतया आलेखफलकं, लेखनी च विद्यते । किन्तु कालिदासशब्दचित्राणि तु निरुपमाण्येव तदर्थं स्वतन्त्रः शोधनिबन्धः विद्यते ।

कालिदासः शृङ्गार–रससम्राट् । वस्तुतः मराठीभाषायां शृङ्गारशब्दः प्रसाधनं शृङ्गारप्रसाधनसाधनविषये आभूषणे प्रयुज्यते । तदनु शृङ्गारक्रिया नाम प्रत्यक्षसम्भोगः । तया क्रियया शृङ्गारः नाम रसनिष्पत्तिः, इत्थमर्थत्रये शृङ्गारशब्दः उपयुज्यते । अस्यां परिषदि Cosmetology and Decoration इत्यस्मिन् विषयेऽपि एकः शोधनिबन्धः अस्ति । कालिदासस्य सर्वाः नायिकाः युवत्यः, रमणीयाः, अलङ्कारमण्डिताश्च सन्ति । तथाप्ययं तस्य मूलसिद्धान्तः यत् स्वाभाविकसौन्दर्यमेव अलङ्काराणां शोभां वर्धयति । अत एव तेनोक्तं – 'इयमधिकमनोज्ञा वल्कलेनापि तन्वी । किमिव हि मधुराणां मण्डनं नावृतीनाम्' (शाकु. 1.17) । अत्राहं स्मरामि मम्मटाचार्यस्य काव्यलक्षणं– 'तददोषौ शब्दार्थौ

सगुणावनलंकृती पुनः क्वापि' क्वचित् अलङ्कारविरहेऽपि न रसहानिः । कथनस्योद्देश्यं तु इदमेव यत् सन्ति वै बहूनि वर्णनानि उत्तमोत्तमप्रसाधनानाम् किन्तु प्रामुख्यं वहति प्राकृतिकसौन्दर्यम् । शकुन्तलायाः प्रसाधननिमित्तं कालिदासः मङ्गलसमालम्भनविरचित इति शब्दं यदा वर्णयति तदा प्रियंवदा खेदं प्रकटयति । वास्तविकतया तव सौन्दर्यं महार्घ्यैः स्वर्णादिरत्नैः अलङ्कारमर्हति । किन्तु अस्माभिः पुष्पपर्णादिभिः अलङ्कृता त्वं न खलु विकृता कृता? तदा कण्वः तपःप्रभावेन शकुन्तलायाः निमित्तं लोकविलक्षणानि प्रसाधनानि प्रापयति तत्र । 'क्षौमं केनचिदिन्दुपाण्डुतरुणा माङ्गल्यमाविष्कृतम्' इत्यादि । धारयितुं क्षौमवस्त्रं, पादयोः लाक्षारसः, गोरोचनादि मङ्गलवस्तूनि सर्वाण्यपि वृक्षेभ्यः प्रापयति । वृक्षेभ्यः एतानि किमर्थं प्राप्तानि इति चेत् आजन्म अवैधव्य सौभाग्यालङ्काराणाम् अमूल्यता तेन व्यज्यते इति डॉ. बाळूराम त्रिपाठी ब्रूते । (शाकुन्तलम् – डॉ. बाळूराम त्रिपाठी, रतन प्रकाशन मन्दिर, आगरा) ।

एवमेव कुमारसम्भवेऽपि विवाहार्थं सन्नद्धा पार्वती अलक्तासिक्तेन पादेन, विवाहकङ्कणेन सुशोभिता, कलहंसलक्षणा वधूः यदा आयाति तदा पाणिग्रहणकाले वधूवरयोः वस्त्रान्तग्रन्थिः क्रियते । कृत्तिवाससा पाणिपीडने तु दुकूलधारिण्यास्तव कथं संकारिष्यते इति तदा भावः उदेति । कपोलादौ कस्तूर्यादिरचितावली पत्रलेखा नाम प्रसाधना । सा च असकृत् वर्णिता कालिदासेन । पुरुषाणामपि अलङ्काराः तेन वर्णिताः । शृङ्गारवर्णने पाटलवर्णस्य माहात्म्यं कालिदासवर्णनेषु सर्वदा दृश्यते नायिकायाः नमनसमये श्यामलकेशपाशात् रक्तपाटलपुष्पं सहसा नायकसमीपे पतितामित्यादिवर्णने शृङ्गारस्य या प्रच्छन्नकल्पना कृता सा अतीव रमणीया तथैव नेत्रयोः कामरक्ता, कपोलयोः रक्ता इत्यादि ।

उपरोक्तशास्त्रेभ्यः भिन्नानि बहूनि अपरशास्त्राणि अस्यां परिषदि अस्पृष्टानि सन्ति । नाट्यशास्त्रम्, आयुर्वेदः, आहारशास्त्रं, युद्धशास्त्रमित्यादि, अल्पीयसि काले कालिदासनिर्दिष्टानां सर्वेषां शास्त्राणां समावेशः अशक्यः इति मे सम्यक् ज्ञानं वर्तते तथापि प्रतीकात्मिकेयं परिषदिति भावयामः । भवन्तोऽपि

निश्चयेन कालिदासात् विभिन्नशास्त्राणि अवाप्नुयुरिति भावये । समुद्र–मथानादस्मात् विविधरत्नानि तु लभ्येरन् एव तथैव शास्त्राणाम् अमृतकुम्भोऽपि हस्तंगतः भवेत्। क्वचित् कालिदासस्य टीकाकारः कश्चिद् हालाहलमपि उपस्थापयेत् तथापि शिवस्य सामर्थ्येन तदपि गृह्णीमः । एतादृशमध्ययनमिदं केवलं कालिदासविषयकं मा भवतु। अपि तु अन्यसंस्कृतकवीनां काव्यानामपि एवमेव अध्ययनं स्यात् । यतः प्रलपन्ति नित्यं केचन यत् संस्कृते केवलं मधुरप्रेमालापः गीयते नो चेत् अमूर्तेश्वरस्य नेत्रे निमील्य साधना क्रियते। एतादृशशास्त्राध्ययनेन संस्कृतवाङ्मयस्य लौकिकगुणाः प्रकाशं यास्यन्ति तथा अस्माभिः जगतः शास्त्रवैभवे योगदानमपि कर्तुं शक्यते । शास्त्रकाव्ययोः सुमधुरमेलनेन वाचकरसिकौ कथं कालिदासः काव्यानन्दे प्लावयति इति ऋतुसंहारवर्णनागुणं मम मराठीकाव्यम् उपस्थाप्य उपसंहरामि मे बीजभाषणम्।

" ग्रीष्माचा तो दाह असो वा शिशिराची शिरशीरी,
वर्षेचा उत्पात असो वा वादळ ते भिरभिरी
हेमंताची बोच कधी कधी शरदाचे चांदणे
मनात हयाचा सदैव असते आनंदाचे गाणे–
ऋतुचक्राची तमा न त्याला फिरतची राहे जरी
आत्मानंदी मग्न सदा तो वसंतबहार उरी त्याच्या वसंतबहार उरी।।"

---------- ☙♦❧ ----------

कालिदासकृतिषु वृत्तविज्ञानम्

डॉ. मधुसूदन पेन्ना

------------------------------------ ☙♦❧ ------------------------------------

कविकुलगुरोः कालिदासस्य प्रज्ञा बहुमुखीना नवच्छटां विदधती सर्वानपि कविराजानतिशेत इति न नूत्नं वचः। संस्कृतसाहितीरसपिपासूनां कृते मन्दाकिनीव विलसन्ती कालिदासप्रज्ञा अद्ययावत् नूत्नेव विराजते। कालिदासस्य गम्भीरप्रज्ञापाटवकारणेन तदीयासु कृतिषु बहुविषयकं विज्ञानं परिस्फुरति । प्राचीनभारतीयविज्ञानरहस्यान्याकलय्य गीर्वाणकृतिरूपेण तच्छाश्वतं कृतवतो महाकवेः कालिदासस्य कृतिषु वृत्तविज्ञानमधिकृत्य यथामति प्रस्तूयते।

'काव्यं तु जायते जातु कस्यचित् प्रतिभावतः' इत्युक्तरीत्या अलौकिकप्रज्ञावतामन्तः स्फूर्तिप्रकाश एव काव्यम्। स्वशब्दसामर्थ्यबलेन कविः पठितॄन् लौकिके जगति नीत्वा अपूर्वानुभवसंपदा तान् रसास्वादे परिप्लुतान् कर्तुमीष्टे। भास–कालिदास–बाण–भवभूतिप्रमुखाः महाकवयः स्वमानस–पटलेऽन्तश्चक्षुषा साक्षात्कृतान् शब्दद्वारा पठितृमनः फलकेऽवतारयितुं क्षमन्ते। तदपि कविगतप्रतिभाविशेषवशात् प्रतिकविः भिद्यते। स्वानुभवविषयमेतं रसास्वादं शब्दद्वारा सहृदयहृदयेषु अवतारयितुं समर्था एव हि महाकवयः। तदर्थं ते शब्दार्थाविव, स्थाने वृत्तप्रयोगेन इतिवृत्तं च महीयो विदधति।

दृश्यश्रव्यभेदेन द्विविधेऽपि काव्ये श्रव्यप्राधान्येन वृत्तानां प्रामुख्यं वर्वर्ति। रसानुगुणवृत्तयोजनेन च श्रोतृमनांसि नितरामाकृष्टानि भूत्वा रसास्वादयोग्यानि भवन्तीति निश्चप्रचम् । अत एव महाकविः क्षेमेन्द्रोऽपि –

"प्रबन्धः सुतरां भाति यथास्थानं निवेशितैः।
निर्दोषैर्गुणसंयुक्तैः सुवृत्तैर्मौक्तिकैरिव।।" (सुवृत्ततिलके)

इत्युक्त्वा सगुणैः दोषरहितैः यथास्थानञ्च निवेशितैः वृत्तैः प्रबन्धः सुतरां भाति इति प्रत्यपादयत् । वृत्तविहीनस्य जीवनमिव प्रबन्धोऽपि वृत्तविहीनो निःसारो भवतीति न पृथग्वक्तव्यम् । अतो वृत्तं कविना विशेषतः परीक्ष्य स्वकाव्ये निवेशनीयमिति ज्ञायते ।

आदिकविवाल्मीकेः श्रीमद्रामायणे अनुष्टुभपि महत् सौन्दर्यमावहत् चिरमस्मन्मनः फलके तिष्ठति ।

वहन्ति वर्षन्ति नदन्ति भान्ति
ध्यायन्ति नृत्यन्ति समाश्वसन्ति ।
नद्यो घना मत्तगजा वनान्ताः
प्रियाविहीनाः शिखिनः प्लवंगमाः ।।

(रामायणे कि. का. 28–27)

इत्यस्मिन् श्लोके यथोद्देश (क्रम) विन्यासः कियान् रमणीयः ! समर्थानां कवीनामनुष्टुभपि स्वकीयार्थबोधने समर्थ भूत्वा कामपि रमणीयतां पुष्णाति –

मेघकृष्णाजिनधरा धारायज्ञोपवीतिनः ।
मारुतापूरितगुहाः प्राधीता इव पर्वताः ।। (तत्रैव 28–10)

एवमनेके श्लोका उदाहर्तुं शक्याः । आनन्दवर्धनैरपि –

अनुरागवती सन्ध्या दिवसस्तत्पुरःसरः ।
अहो दैवगतिश्चित्रा तथापि न समागमः ।। (ध्वन्यालोके 1–8)

इत्यत्र वाच्यप्रतीतिप्राधान्यं प्रतिपादयद्भिर्महर्षिपाणिनिकृतं पद्यमेव समुदाहारि । लघुपदैरपि महान्तमर्थं बोधयतां महाकवीनां सामर्थ्यमियत्तादूरं भवति खलु ।

वृत्तनियोजने महाकविकालिदासः सर्वेषामपि कवीनां पथदर्शी वैदर्भरीतेरनुपमनिदर्शनेन स्थायुकं यशः समवाप इति वयं विद्मः ।

कविकुलगुरुर्लोके कालिदासोऽयमेककः ।
नभस्यादित्यदीधित्या चकास्ति कविसंसदि ।।

पिङ्गल–केदारभट्टादिवृत्तविद्भिरनेकानि वृत्तानि प्रदर्शितानि । तत्र गङ्गादासेन तावत् महता परिकरेण उपत्रिशत–वृत्तानि सोदाहरणं चर्चितानि । महाकविप्रयोगत एव तेषां यथास्थाननिवेशनमवगन्तव्यमिति तु वृत्ततत्वम् ।

महाकविकालिदासः वैदिक–लौकिकवृत्तरहस्यं वेत्ति । स्वकृतिषु यथावसरञ्च तेषां विनियोजनमपि दर्शितवान् । प्राकृतवृत्तानाम् अपभ्रंशगतानामपि स्वरूपं प्रदर्श्य स्वकीयं समाजविज्ञानमपि सः प्रादीदर्शत् । तस्य कृतीनां पर्यालोचनेन वृत्तविषयकमितिवृत्तमेवंरीत्या प्रस्तोतुं शक्यं भाति ।

महाकविकालिदासेन स्वकृतिषु प्रयुक्तानि वृत्तानि, तेषु च अधिक प्रयुक्तानि सकृदेव प्रयुक्तानि प्रसिद्धान्यपि सकृदपि अप्रयुक्तानि – इत्येवं रीत्या तद्दर्शयितुं शक्यते ।

1. कालिदासप्रयुक्तानि वृत्तानि :

1. मन्दाक्रान्ता	11. वंशस्थाविलम्	21. रुचिरा
2. शार्दूलविक्रीडितम्	12. वसन्ततिलका	22. वैतालीयम्
3. आर्या	13. द्रुतविलंबितम्	23. औपरछन्दसिकम्
4. गीतिः	14. हारिणी	24. अपरवक्त्रम्
5. अनुष्टुभ्	15. पृथ्वी	25. द्विपदिका
6. मालिनी	16. स्रग्धरा	26. चर्चरी
7. शालिनी	17. रथोद्धता	27. तेना
8. प्रहर्षिणी	18. शिखरिणी	28. खण्डकम्
9. उपजातिः	19. पुष्पिताग्रा	29. सुरकम्
10. वंशस्थम्	20. वियोगिनी	

2. अप्रयुक्तानि वृत्तानि :–

1. दोधक–तोटक–पञ्चचामर–प्रमिताक्षरा–भुजङ्गप्रयात–प्रमुखानि।

3. अल्पप्रयुक्तानि वृत्तानि –

1. रघुवंशकुमारसंभवयोः शार्दूलविक्रीडितप्रयोगो न दृश्यते ।

2. अभिज्ञानशाकुन्तले रुचिरा (7–35), स्रग्धरा (1–1, 7) रथोद्धता (7–18) इत्येतानि सकृदेव प्रयुक्तानि ।

अधिकप्रयुक्तानि वृत्तानि –

1. अनुष्टुभ् – 53 श्लोकगतं वृत्तम्

रघुवंशे – 1–1, 4, 10, 12, 15, 17 सर्गेषु

कुमारसंभवे 2 सर्गे

अभिज्ञानशाकुन्तले – 1– 5, 6, 11, 12, 23,
2– 13, 16, 17
3– 1, 21
4– 4, 7
5– 14, 24, 26, 29
6– 14, 22, 23, 28, 32
7– 9, 13, 14, 15, 23, 28, 29

विक्रमोर्वशीये – 1– 14, 16, 15
2 – 4, 5, 16, 18

मालिविकाग्निमित्रे – 1– 10, 18
2 – 9
4 – 4, 6, 12
5 – 11, 12, 13, 15, 18

2. आर्या – अभिज्ञानशाकुन्तले, विक्रमोर्वशीये, मालविकाग्निमित्रे च भूयस्त्वेन प्रयुक्तं वृत्तम् ।

कालिदासस्य प्रियेषु वृत्तेषु अनुष्टुभ्, आर्या, उपजातिः, मन्दाक्रान्ता, वसन्ततिलका, मालिनीत्येतानि प्रमुखतया दृश्यन्ते ।

वृत्तविनिवेशः –

कस्मिन् सन्दर्भे कस्य भावस्य प्रकाशनाय किं वृत्तं प्रयोक्तव्यमिति महाकवयः निशितप्रज्ञया विभाव्यैव स्वकृतिषु प्रयुञ्जते ।अत एव वृत्तविनियोगाख्ये तृतीयस्तबके कविराजक्षेमेन्द्रेण सुष्ठु भणितम् –

तथाप्यवस्थासदृशैः साधुशब्दपदस्थिताः।
सुवृत्तैरेव शोभन्ते प्रबन्धाः सज्जना इव ।। (12)

वृत्तरत्नावली कामादस्थाने विनिवेशिता।
कथयत्यज्ञतामेव मेखलेव गले कृता ।। (13)

सुवर्णार्हप्रबन्धेषु यथास्थाननिवेशिताम् ।
रत्नानामिव वृत्तानां भवत्यभ्यधिका रुचिः ।। (37)

अपरोऽप्यस्ति विशेषः । विभिन्नानामनेकवृत्तानां यथास्थाननिवेशेन कवीनां प्रतिभा स्फुटमभिव्यक्ता भवति । कालिदासस्य बहुवृत्तज्ञानस्य प्रयोगकौशलस्य च कारणेन तदीयवर्ण्यविषयमहत्त्ववं श्रोतृमनःसु प्रतिष्ठितं भवति।

वृत्तप्रयोगकौशलम् –

महाकविकालिदासस्य वृत्तप्रयोगकौशलमनितरसाधारणम् ।तदेव वृत्तं अपरेण कविनाऽपि प्रयुक्तं चेदपि महाकविकालिदासेन प्रयुक्तमेव वैदर्भरीति–समञ्चितं हृदयान्याह्लादयति। तत्र यथा रघुवंशप्रथमसर्गे अनुष्टुभ्–निवेशः। कुमारसंभवे च द्वितीयसर्गे, शाकुन्तलेऽपि संपूर्णे नाटके बहुधा कृतः स प्रयोगः मनोहरो भवति ।

आरम्भे सर्गबन्धस्य कथाविस्तारसंग्रहे ।
शमोपदेशवृत्तान्ते सन्तः शंसन्त्यनुष्टुभम् ।। (सुवृत्ततिलके 3--16)

इति क्षेमेन्द्रः महाकवेरस्य वृत्तविनियोगमवलोक्यैव संप्रेरितः सन् नियममकार्षीदिति भाति ।

रघुवंशस्य कथाप्रबन्धारम्भः अनुष्टुभा कृतः। तत्र रघुवंशस्य महत्त्वं दिलीपस्य वर्णनमित्यादिकं सर्वमनुष्टुभ्–वृत्तेनैव वर्णितम् येन प्रथमसर्गगताः प्रायः सर्वेऽपि श्लोकाः अधुनाऽपि विदुषां जिह्वाग्रमधितिष्ठन्तः समुल्लसन्ति।

रथोद्धता निभावेषु भव्या चन्द्रोदयादिषु ।
वाड्गुण्यप्रगुणानीति वंशस्थेन विराजते ।। (सु.ति. 3–18)

इत्युक्तरीत्या चन्द्रोदयादिवर्णने रथोद्धता श्रेष्ठा भवति ।

अङ्गुलीभिरिव केशसंचयं संनियम्य तिमिरं मरीचिभिः ।
कुड्मलीकृतसरोजलोचनं चुम्बतीव रजनीमुखं शशी ।।
(कुमारसंभवे 8–63)

प्रायः प्रकृतिवर्णनसन्दर्भेषु महाकविकालिदासः मन्दाक्रान्तावृत्तं (यथा मेघदूते), रथोद्धतावृत्तं (यथा कुमारसंभवे) वसन्ततिलका, मालिनी वृत्ते कृताभिनिवेशो दृश्यते (यथा ऋतुसंहारे)। उपजातेरपि साधुप्रयोगो महाकविकृतिषु साधारणः। उपदेशसन्दर्भेषु प्रायः अनुष्टभ्–वृत्तस्यैव प्रयोगो दृश्यते यथा कुमारसंभवे द्वितीयसर्गे।

वृत्तभङ्ग/यतिभङ्गादिकम् –

महाकविकालिदासश्लोकेषु वृत्तभङ्गस्य सन्दर्भाः अतीव विरलाः। अनुष्टुभः प्रयोगे पञ्चमं लघु सर्वत्र इत्यस्य नियमस्य अपवादो यथा रघुवंश प्रथमसर्गे दृश्यते –

तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः ।
दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव ।। (1–2)

अत्र पञ्चमलघुवर्णस्य स्थाने गुरुवर्णप्रयोगेन वृत्तभङ्गो दृश्यते। परन्तु परवर्तिनां शास्त्रकाराणां दृष्ट्या दोषोऽयं न महान् भवति ।अत एव कालिदास प्रयोगं समर्थयन्निव क्षेमेन्द्रः सर्वथा श्राव्यतैव गरीयसी न वृत्ताक्षरगणनेति बभाण।

तत्राप्यनियमो दृष्टः प्रबन्धे महतामपि ।
तस्मादव्यभिचारेण श्रव्यतैव गरीयसी ।।

वृत्तशास्त्रकारैर्दर्शितयतिनियमानां यथावत् परिपालनं महाकविना न कृतं प्रत्युत श्रव्यताप्रधानत्वमेव मनसि निधाय काव्यरचना कृतेति दृश्यते ।

यतिर्जिह्वेष्ट विश्रामस्थानं कविभिरुच्यते ।
सा विच्छेदविरामाद्यैः पदैर्वाच्या निजेच्छया ।। (छन्दोमञ्जरी 1–12)

इति श्रीगङ्गादासोक्तमनुसृत्य यतिर्विरामस्थानं भवति। तत्र कालिदासकृतिषु

'कश्चित्कान्ता – विरहगुरुणा' (मेघदूते)
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु (मेघदूत)
लग्नद्विरेफाञ्जनभक्तिचित्रं (कुमारसंभवे 3–30)

विशिष्टवृत्तप्रयोगः

विक्रमोर्वशीयस्य तृतीयाङ्के चतुर्थाङ्के च विशेषतः महाकविना यानि वृत्तानि प्रयुक्तानि तानि तत्कालीन प्रयोगावसरं लक्ष्यीकृत्य सहृदयग्राह्यताञ्च मनसि निधाय कृतानीति भाति। तथाहि विक्रमोर्वशीये द्विपदिकेति तेनेति गाथे, चर्चरी, खण्डक, खुरकेति च गाथा गीतीप्रकाराः अवश्यं द्रष्टव्याः। अयमेव संदर्भः महाकवेरस्य नाट्यविज्ञानमप्यभिव्यनक्ति। तेन गीतिविशेष इति कोणेश्वरी व्याख्याता लिखति (182 पृष्ठे) एवं संक्षेपेणेदं वक्तुं शक्यते यत् कवीश्वरः कालिदासः तत्कालीन समाजस्य हृदयं जानन् स्वकृतिषु योग्यप्रयोगं च कृतवान् अत एव महाकविरिति चिरं यशः प्राप्तवान् ।

साधारणोपदेशादिवर्णने अनुष्टभ्, उपजाति, वसन्ततिलका वृत्तानां प्रकृतिवर्णने मन्दाक्रान्ता, उपजाति, रथोद्धतादिवृत्तानां, मानसिकभावनानां वर्णने उपजाति, मन्दाक्रान्ता, मालिनी, प्रहर्षिणीत्यादि वृत्तानाञ्च प्रयोगेण महाकविकालिदासः स्वकृतीः जगति वितत्य तासु यशोरूपेण जीवति।

जयन्ति सुकृतिनो लोके
रससिद्धाः कवीश्वराः ।
नास्ति येषां यशः काये
जरामरणजं भयम् ।।

रघुवंशम्

भूदेवताकस्य सर्वगुरोर्मगणस्य प्रयोगाच्छुभलाभः व कारस्य अमृतबीजत्वम्

1. आदौ अनुष्टुभ्, सर्गान्ते प्रहर्षिणी
2. उपजातिः, –मालिनी
3. वंशस्थ, –हरिणी
4. अनुष्टुभ्, –प्रहर्षिणी
5. उपजाति, –पुष्पिताग्रा
6. उपजाति, –मालिनी, पुष्पिताग्रा
7. उपजाति, –मालिनी, पुष्पिताग्रा
8. वैतालीय –प्रहर्षिणी,वसन्ततिलका.,मन्दाक्रान्ता
9. दुतविलम्बितम्– वसन्ततिलका
10. अनुष्टुभ्, –मालिनी.
11. रथोद्धता–मालिनी
12. अनुष्टुभ्–मालिनी/वसन्ततिलका
13. उपजाति, –वसन्ततिलका
14. उपजाति, –मन्दाक्रान्ता

15. अनुष्टुभ्,– मन्दाक्रान्ता
16. उपजाति, –वसन्ततिलका/ मन्दाक्रान्ता
17. अनुष्टुभ्, –मन्दाक्रान्ता
18. उपजाति, –मालिनी
19. रथोद्धता– मन्दाक्रान्ता

कुमारसंभवम्

1. उपजाति– मालिनी
2. अनुष्टुभ् –मालिनी
3. उपजाति– मालिनी
4. वियोगिनी –पुष्पिताग्रा
5. वंशस्थ –वसन्ततिलका

अभिज्ञानशाकुन्तलम्

1.	रुचिरा –	7–35
2.	प्रहर्षिणी –	6–27, 30
3.	औपच्छन्दसिकम्–	7–16, 21
4.	स्रग्धरा	1– 1, 7
5.	रथोद्धता	7– 18
6.	आर्या –	1 – 2, 1–3, 13, 15, 16, 19, 22, 25, 26, 31, 2–1, 8, 3--2, 4, 5, 6, 10, 13, 15, 16, 18, 20/12, 16, 21/5–11/13, 16, 18, 21, 28, 31/6–2, 3, 7, 15, 19, 21, 31/7–22
7.	गीति –	1–4 / 3–14
8.	त्रिष्टुभ् –	4–8

9.	अनुष्टभ् –	1–5, 6, 11, 12, 23/2–13, 16, 17/3–1, 21/4–4, 7, 5–14, 24, 26, 29 / 6–14, 22, 23, 28, 32/ 7–9, 13, 14, 15, 23, 28, 29
10.	वसन्ततिलका –	1 – 8, 24, 28 / 2– 9, 12, 3– 9, 19, 25/ 4– 2, 3, 11, 13,14, 15, 20 / 5 – 2, 3, 6, 22, 23 / 6 – 12, 16, 20, 25 / 7 – 4, 6, 17, 26, 32
11.	शिखरिणी –	1– 9, 7–33,
12.	मालिनी –	1–10, 17, 18 / 2–4, 3–3 / 5–7, 8 / 5 – 19 / 7–7, 34
13.	शार्दूलविक्रीडितम्–	1– 14, 27 / 2–2, 5, 6, 3– 8, 3–24 / 4–5, 6, 9, 17, 18 / 5– 9/ 6–4, 5, 6, 17/ 7– 8, 11, 12, 27
14.	मन्दाक्रान्ता –	1 – 15, 30 / 2 – 14, 15
	वंशस्थम्–	1–17, 20 / 3–12 / 9–1 / 5–12, 15, 17/ 6– 13, 18, 29 / 7–10, 16, 30
	शिखरिणी–	1–21 / 2–10 / 3–6 / 5–10 / 6–9 29 / 2–3 / 6–11
	पुष्पिताग्रा –	
	उपजातिः –	2–7 / 5–5, 4, 20, 25 / 6 – 10, 24, 26 / 7 – 2, 5, 19, 31
	द्रुतविलम्बितम् –	2– 18 / 6–1 / 7–1
	हरिणी –	3–11 / 4–19 / 7–24
	औपच्छन्दसिकम् –	3 – 22, 23

	अपरवक्त्रम्	4–10 / 5–1
	शालिनी	5–30

विक्रमार्वशीयम्

1.	शार्दूलविक्रीडितम् –	1–1, 5, 10 / 2– 7, 19
2.	आर्या –	1–2, 7, 8, 12 / 2– 2, 3, 20
3.	प्रहर्षिणी–	1– 3
4.	वसन्ततिलका –	1–4 / 2–13, 15 / 4– 16, 25
5.	वंशस्थम् –	1– 6, 11 / 4 – 17
6.	मन्दाक्रान्ता –	1– 9, 2–1 / 4– 13
7.	अनुष्टुभ् –	1–14, 16, 15 / 2 – 4, 5, 16, 18
8.	गीति –	1–17, 18 / 2–8, 3–22, 4–4, 5
9.	उपजाति –	1– 19, 20
10.	मालिनी –	2– 6 / 4 – 22, 27
11.	द्रुतविलम्बित् –	2 – 9
12.	हरिणी –	2 – 10, 4 – 7
13.	पृथ्वी –	2 – 11
14.	द्विपदिका (गाथा)	3– 2, 7 / 4–10, 15, 17, 28, 29
15.	चर्चरी	4–11, 12, 13 / 4–20, 21, 24
16.	तेना (गीतिः)	182, 4–12
17.	खण्डक (गीतिः)	4–19
18.	खुरक	4–23

---------- ଓ♦ଓ ----------

कालिदासस्य साहित्ये काव्यशास्त्रीयविचाराः

डॉ. नंदा पुरी

रुणद्धि रोदसी चास्य यावत्कीर्तिरनश्वरी ।
तावत्किलायमध्यास्ते सुकृती वैबुधं पदम् ।।[1]

यावत्पर्यन्तं कविकीर्तिः स्वर्गं पृथिवीञ्च आसमन्तात् व्याप्नोति तावत्तस्य कवेः स्वर्गेऽधिवासः निश्चितः । तेनैव कारणेन अद्यापि कालिदाससदृशः कविः अस्मिन् भूतले नावतरितः । 'अनामिका सार्थवती बभूव' इति यथार्थोक्तिः खलु सुभाषितकारस्य । 'येषां संस्कारवती वाणी कवित्वबीजरूपा दिव्या च शक्तिः रसपूर्णं सर्वाङ्गसुन्दरं च काव्यं ते कालिदासादयः द्वित्राः कवयः सन्ति भूतले ।' तेषां काव्यं नित्यनूतनत्वेनास्वाद्यम् । एतादृशस्य कविकुलस्य गुरुरयं कालिदासः । तस्य नाट्यकौशलं वैश्विकस्तरे अनुमतम् । नाटकेषु यत्र तत्र उल्लिखिताः नाट्यशास्त्रीयसन्दर्भाः सङ्कल्पनाश्च दृष्ट्वा तस्य नाट्यशास्त्रस्य गभीराध्ययनं ज्ञायते एव । 'भरतः भारतीयपरम्परायाः आविष्कर्ता, संस्थापकः प्रवचनकारश्च कालिदासस्तु तासां परम्पराणां प्रथमः नैष्ठिकप्रयोक्ता इत्युक्तं पारसनाथ द्विवेदी महोदयेन ।[2] कालिदासस्य नाट्यशास्त्रीयोल्लेखानां समीक्षा मया अन्यत्र कृता अस्ति ।[3] काव्यशास्त्रीयविचाराः तस्यैव काव्यस्याधारेण द्रष्टव्याः इति मनसि निधाय विषयोऽयं स्वीकृतः । रसविषयकविचारास्तु नाट्ये काव्ये च उभयत्र द्रष्टव्याः ।

भामहादारब्धं काव्यशास्त्रं कालिदासादनन्तरमेव निर्मितम् । तर्हि कालिदासस्य काव्यग्रन्थेषु कीदृशं स्वरूपं काव्यशास्त्रस्य इत्येव अस्य शोधनिबन्धस्य विषयः । प्रायः सर्वैः काव्यशास्त्रज्ञैः काव्यस्य शरीररूपेणशब्दार्थौ गृहीतौ । एतयोः शब्दार्थयोरैक्यं कालिदासेन रघुवंशस्य मङ्गलश्लोके प्रतिपादितम् ।

वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ।।[4]

वागर्थस्य ऐक्यमेव काव्यसृष्टेः निर्मितिकारणम् । कालिदासेन काव्यविषयकं महत्त्वपूर्णं तत्त्वं प्रतिपादितमत्र । यथा पार्वतीपरमेश्वरौ जगतः पितरौ तद्वदेव वागर्थौ काव्यजगतः पितरौ । मल्लिनाथः एतयोः नित्यसम्बन्धं प्रतिपादयति । 'नित्यसंबद्धयोरुपमानत्वेनोपादानात् । नित्यः शब्दार्थसंबन्धः इति मीमांसकाः ।' न केवलं नित्यसंबन्धः अपि तु निर्मितिक्षमत्वमपि महत्त्वपूर्णमत्र । संपृक्तौ पदेन शब्दार्थस्य अविनाभावसंबन्धः व्यज्यते ।अर्थप्रतिपत्तिर्नाम अर्थत्रयस्य ज्ञानम् (वाच्यार्थः, लक्ष्यार्थः व्यङ्ग्यार्थश्च) परमेश्वरः परमश्चासौ ईश्वरः । अत्र परमशब्दः सर्वोत्तमत्वद्योतनार्थः । पितरौ इति एकशेष– द्वन्द्वेनापि शब्दार्थयोरैक्यमेव सूच्यते ।

वस्तुतस्तु शब्दार्थाविवात्र अपेक्षितौ परम् उपमाया औचित्यार्थं कालिदासेन वाणीरूपमुपमानं स्वीकृतम् यतो हि शक्तिं विना निर्मितिरशक्या । नो चेत् शिवः स्पन्दितुमपि न कुशल इति शङ्कराचार्येणोक्तं सौन्दर्यलहर्याम् ।[5] अर्थज्ञाने वाण्या एव ग्रहणं प्रथमं भवति ।अतः सा पार्वतीव रमणीया चित्ताकर्षका चास्तु ।अर्थे च गांभीर्यं भवतु । वागर्थप्रतिपत्तिर्नाम– शब्दार्थयोः सम्यग् ज्ञानम् । 'एकःशब्दः सुप्रयुक्तः सम्यग् ज्ञातः स्वर्गे लोके च कामधुग् भवति' इति सुप्रसिद्धं वचनम् ।

वाच्यार्थेन मङ्गलाचरणमिदम् । परं वाग्रूपा सरस्वती यत्र स्वयमेव प्रस्रवति आनन्दरसं, तत्र अन्य एव परमार्थः । कोऽयमर्थः? प्रश्नस्यास्योत्तरं अत्रैव प्राप्यते । कालिदासः वदति 'सूर्यप्रभववंशमाश्रित्य महाकाव्यरचना कार्या । कवियशः प्रार्थी मन्दोऽहम् उपहास्यतां गमिष्यामि । रघूणां गुणैरेव प्रचोदितोऽहम् । नास्ति में तावान्वाग्विभवः इति । महाकाव्यं रचितुमावश्यकं शब्दप्रभुत्वं अर्थप्रागल्भ्यञ्च ।अत एव कालिदासेन वागर्थप्रतिपत्तये पार्वतीपरमेश्वरौ प्रार्थितौ । तस्य पदरचनासु पार्वतीव कामनीयकत्वं अर्थे च परमेश्वर इव गांभीर्य श्रेष्ठत्वं च दृश्यते ।अयमेव वागर्थप्रतिपत्तेः ध्वन्यर्थः ।

काव्यलक्षणसन्दर्भे सर्वैः काव्यविद्भिः शब्दार्थयोर्महत्त्वं स्वरूपञ्च प्रतिपादितम् । शब्दार्थविषयेऽन्यानां काव्यविदां मतं पश्यामः । 'शब्दार्थौ सहितौ काव्यम्' इति भामहस्य काव्यलक्षणम् ।[6] 'काव्यं ग्राह्यम् अलङ्कारात्' इत्येतं वचनमनुसृत्य गुणालङ्कारसंस्कृतयोः शब्दार्थयोः साहित्यमत्रापेक्षितम् । वामनाचार्येण सौन्दर्याधायकत्त्ञ्वरूपेण अलङ्काराः वर्णिताः, आत्मत्तत्वरूपेण रीतिश्च स्वीकृता । 'ध्वनिं विना शब्दार्थौ निर्जीवदेहवत् त्याज्यौ' इति आनन्दवर्धनस्य मतम् ।

कुन्तकस्य काव्यलक्षणे शब्दार्थयोः सहितिरेव अपेक्षिता परं तत्र वक्र–व्यापारयुतौ आह्लाददायकौ च शब्दार्थौ अपेक्षितौ । शब्दार्थयोः दोषरहित्तत्वमपि तेन प्रतिपादितम् । स वदति – 'अन्यूनातिरिक्तवमनोहारि व्यवस्थितिः । न्यूनपदता अधिकपदतादोषरहित–मनोहारिणी स्थितिः नाम शब्दार्थयोः सहितिः ।[7] क्षेमेन्द्रेण औचित्यं प्रतिपादितम् । मम्मटाचार्येण परिष्कृतं काव्यलक्षणम् । अदोषौशब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि । इति प्रतिपाद्य काव्यलक्षणे शब्दार्थयोरदोषता, गुणयुक्ता, क्वापि अनलङ्कृत्ताऽपि स्वीकृता । जगन्नाथपण्डितस्य मतं – 'न तत्र उभयनिष्ठधर्मः । काव्यत्वं केवलं शब्देषु । अत एव 'रमणीयार्थ प्रतिपादकशब्दः काव्यम्' इति तेनोक्तम् काव्यलक्षणम् ।

एवं सर्वैः काव्यविद्भिः काव्यलक्षणेषु शब्दार्थयोः सहभावः प्रतिपादितः । तस्य मूलं कालिदासस्य आस्मिन् श्लोके वर्तते इति मम मतम् । वागर्थाविव पार्वतीपरमेश्वरौ इत्यनया उपमया शब्दार्थयोः निर्दुष्टत्वं, सालङ्कृत्तवं, सगुणत्वं रमणीयकत्वं, परमार्थत्वञ्च कालिदासेन सूचितम् । एतदेव उपमाया औचित्यम् अयमेव ध्वन्यर्थः । उपमा कालिदासस्य इति तस्य उपमासौन्दर्यं सर्वविदितमेव । एषा एव मे अभिमततमा उपमा ।

वाणीविषयकविचाराः–

उपर्युक्तविवरणे वाक् पार्वतीव इति स्पष्टीकृतम् । कालिदासस्य ग्रन्थेषु बहुत्र वाणीविषयकोल्लेखाः आगताः । तेन वयं तस्य वाणीविषयकविचारान् ज्ञातुं

शक्नुमः । कुमारसम्भवे सः वदति – 'संस्कारवत्येव गिरा मनीषी तया स पूतश्च विभूषितश्च ।[8] कविः संस्कारवत्या गिरा पूतः विभूषितश्च भवति । "कविर्मनीषी परिभूः स्वयंभूः' इति ईशावास्य उपनिषदि उक्तम्[9] कविः ब्रह्मवत्शुद्धसत्त्वमनसः ईषा । स्वामी विश्व्यव्याप्त–स्वयंभूरस्ति । संस्कारो व्याकरणजन्या शुद्धिस्तद्वत्या गिरा वाचा । रघुवंशस्य दशमसर्गे विष्णुस्तुतिप्रसङ्गे कालिदासेनोक्तम् –

पुराणस्य कवेस्तस्य वर्णस्थानसमीरिता ।
बभूव कृतसंस्कारा चरितार्थैव भारती ।।

बभौ सदशनज्योत्स्ना सा विभोर्वदनोद्गता ।
निर्यातशेषा चरणाद्गङ्गेवोर्ध्वप्रवर्तिनी ।।[10]

भगवान् विष्णुः पुराणकविः । तस्य मुखात् कण्ठादिभ्यः उच्चारणस्थानेभ्यः निर्गता वाणी जन्मफलमवाप्नोत् गङ्गेव उर्ध्वगामिन्यभवत् । कुमारसम्भवे तारकासुरपीडितैः इन्द्रादिदेवैः ब्रह्मदेवस्य स्तुतिप्रसङ्गे वाण्याः स्वरूपं स्पष्टीकृतम् –

पुराणस्य कवेस्तस्य चतुर्मुखसमीरिता ।
प्रवृत्तिरासीच्छन्दानां चरितार्था चतुष्टयी ।।[11]

अत्र 'पुराणकविः' इति विशेषणं ब्रह्मदेवस्य कृते प्रयुक्तम् ।

चतुष्टयीशब्दस्य अर्थः मल्लिनाथेन स्पष्टीकृतः । द्रव्यगुणजातिभेदेन चत्वारोऽवयवा यस्या इति चतुष्टयी चतुर्विधा ।शब्दानां प्रवृत्तिः वैखरीप्रमुखा वाग्वृत्तिः । उक्तं च 'वैखरीशब्दनिष्पात्तिर्मध्यमा श्रुतिगोचरा । द्योतितार्था च पश्यन्ती सूक्ष्मा वागनपायिनी । पतञ्जलिना महाभाष्ये शब्दानां चतुष्टयी प्रवृत्तिरुक्ता । अत्र शब्दानां चतुष्टयी प्रवृत्तिः नाम परा, पश्यन्ती, मध्यमा वैखरी इति चतुर्विधा वाणी । वाण्यैषा सफला अभवत् । उभयत्र वाण्याः सफलत्वं प्रतिपादितम् । कृतसंस्कारा, संस्कारवती, पूता विभूषिता च इत्येतैः विशेषणैः वाण्याः शुद्धं सात्त्विकं संस्कारितञ्च स्वरूपं कालिदासेन स्पष्टीकृतम् । एषा शुद्धा सात्त्विकी च वाणी सफला भवति इति तस्य मतम् ।

रघुवंशे दिलीप–वसिष्ठसंवादे दिलीपस्य वाक्कौशलविषये कालिदासेनोक्तम्।

'अर्थ्यामर्थपतिर्वाचमाददे वदतां वरः।'[12]

दिलिपः अर्थ्या वाचम् आददे । उत्तमवक्ता अर्थपूर्णवाण्याः प्रयोगं करोति उपर्युक्तैः विशेषणैः सह वाण्याः अर्थपूर्णत्त्वमपि आवश्यकमिति उक्तम्।

काव्यसौन्दर्यम् – 'क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयताय' एतदेव सौन्दर्यस्य लक्षणम्। मालविकाग्निमित्रम् नाटके मालविकायाः सौन्दर्यविषये कालिदासेनोक्तम् 'प्रतिक्षणं मे भवति स एव नवो नवोऽयमक्ष्णोः।' अलङ्कारैः रमणीयत्वं रसमयत्वेन नित्यनूतनत्वं च तस्य मेघदूतशाकुन्तलरघुवंशादिषु ग्रन्थेषु वयमनुभवामः। काव्यस्य आन्तरिकी रमणीयता रसमयत्वेन भवति बाह्य–सौन्दर्यञ्च अलङ्कारयोजनया वर्धते । ध्वन्यात्मभूते शृङ्गारेऽलङ्कारनिबन्धन कथं कर्तव्यमित्यास्मिन् विषये आनन्दवर्धनः वदति

रसाक्षिप्ततया यस्य बन्धः शक्यक्रियो भवेत्।
अपृथग्यत्ननिर्वर्त्यः सोऽलङ्कारो ध्वनौ मतः।।[13]

शाकुन्तलस्य –

चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमर्ती
रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः।
करौ व्याधुन्वन्त्याः पिबसि रतिसर्वस्वमधरं
वयं तत्वान्वेषान्मधुकर हतास्त्वं खलु कृती।।[14]

इत्यस्मिन्श्लोके 'अत्र हि भ्रमरस्वभावोक्तिरलङ्कारो रसानुगुणः' इति आनन्दवर्धनः वदति। अभिनवगुप्तेनापि तदङ्गीकृतम्। 'भ्रमरस्वभावोक्ति–रलङ्कारोऽङ्गतामेव प्रकृतरसस्योपगतः अलङ्काराणाम् औचित्यपूर्णप्रयोगेनैव काव्यसौन्दर्यं वर्धते इति कालिदासस्य मतम् । कुमारसम्भवे पार्वत्याः सौन्दर्यवर्णने दृश्यते–

सर्वोपमाद्रव्यसमुच्चयेन यथाप्रदेशं विनिवेशितेन ।
सा निर्मिता विश्वसृजा प्रयत्नादेकस्थसौन्दर्यदिदृक्षयेव।।[15]

विधात्रा विश्वस्य संपूर्णं सौन्दर्यं एकस्थदिदृक्षया सर्वं उपमाद्रव्यं एकत्रीकृत्य यथाप्रदेशं तेन विनिवेशितम्। सौन्दर्यवर्धनायालङ्काराणामौचित्यं परामृश्य यथाप्रदेशं निवेशनमावश्यकमिति कालिदासस्य मतमेव आनन्दवर्धनेन रसमयकाव्ये अलङ्कारनिबन्धनं कथं कर्तव्यमिति सविस्तरं प्रतिपादितम्।

आन्तरिकसौन्दर्येण सह बाह्याकृतिरपि रमणीया अस्तु इति कालिदासस्य मतम् । अहो सर्वास्ववस्थासु रमणीयत्वमाकृतिविशेषणाम् 'किमिव हि मधुराणां मण्डनं नाकृतीनाम्।' आकृतिविशेषेषु आदरः पदं करोति इत्येतेषु वाक्येषु दृश्यते।

'अन्योन्यशोभापरिवृद्धे ये योगस्तडित्तोयदयोरिवास्तु'[16] तत्त्वमिदं काव्यस्योत्कर्षाधायकम् ।

रसभावविचाराः –

रसविमर्शे भरतस्य रससूत्रं महत्त्वपूर्णम्। विभावानुभावव्यभिचारि–संयोगाद्रसष्पित्तिः।[17] भावशब्दस्य लक्षणं भरतेनोक्तम् –

वागङ्गमुखरागेण सत्त्वेनाभिनयेन च ।
कवेरन्तर्गतं भावं भावयन् भाव उच्यते।।[18]

विभावो विज्ञानार्थः । विभाव्यन्तेऽनेन वागङ्गसत्त्वाभिनया इत्यतो विभावाः। तस्य भेदद्वयम् ललनादि–आलम्बनविभावाः उद्यानादि उद्दीपनविभावाः।' वागङ्गाभिनयेनेह यस्त्वर्थोऽनुभाव्यते ।

शाखाङ्गोपाङ्गसंयुक्तस्त्वनुभावस्ततः स्मृतः।।[19]
विविधम् अभिमुख्येन रसेषु चरन्तीति व्याभिचारिणः।

एतेषां भावानां संयोगेन रसनिष्पात्तिर्भवतीति भरतेनोक्तम्।

कालिदासेन 'भाव'शब्दः अनेकार्थे प्रयुक्तः यथा 'भावार्द्रमस्या मनः'[20] अत्र प्रेमार्द्रता अपेक्षिता, भावशून्यः[21] अत्र भावनाहीनत्वम्, भावस्थितीः नाम

मनःस्थितिः । नाट्यशास्त्रदृष्ट्या भाववर्णनं मालविकाग्निमित्रमित्यास्मिन्नाटके दृश्यते । परिव्राजिकया मालविकायाः नृत्यस्य कृतं विश्लेषणमत्र द्रष्टव्यम् ।

अङ्गैरन्तर्निहितवचनैः सूचितः सम्यगर्थः
पादन्यासो लयमनुगतस्तन्मयत्वं रसेषु ।
शाखायोनिर्मृदुरभिनयस्तद्विकल्पानुवृत्तौ
भावो भावं नुदति विषयाद्रागबन्धः स एव ।।[22]

अन्तर्निहितवचनैः अभिनयेन सम्यगर्थः सूचितः । तस्या पादन्यासः लयमनुगतः । रसेषु तल्लीनता । शाखा–पद्धत्याः मृदुरभिनयः । अनुवृत्तिर–भिनयपरिवर्तने । तदनुसृत्य भावो भावं नुदति । स एव रागबन्धः । सा एव रञ्जकता ।

काटय–वेमभूपस्य टीकामनुसृत्य अत्र भावशब्दः स्थायी तथा सञ्चारिभावस्य कृते प्रयुक्तः । भावो निर्वेदादि भवि पूर्वाभिमानादानीतं सञ्चारिणं नुदत्यपाकरोति । मालविकाया नृत्याविष्कारः प्रथमं द्रष्टव्यः । तेनैव कथं भावो भावं नुदति इति ज्ञातुं शक्यते । चतुष्पदीगीतस्य साभिनयं नृत्यं करोति मालविका–

दुर्लभः प्रियस्तस्मिन् भव हृदय निराशम्
अहो अपाङ्गको मे प्रस्फुरति किमपि वामकः ।
एष स चिरदृष्टः कथमुपनेतव्यो
नाथ मां पराधीनां त्वयि गणय सतृष्णाम् ।।[23]

मालविका गीतेन भावाभिनयेन च अग्निमित्रविषयकीं रतिमाविष्करोति । चतुष्पदवस्तुकं द्वारीकृत्य त्वय्युपक्षिप्त इवात्मा तत्रभवत्या इति विदूषकः वदति । अत्र प्रथमपङ्क्तौ निर्वेदः, द्वितीयपङ्क्तौ हर्षः तृतीयपङ्क्तौ चिन्ता अन्तिमपङ्क्तौ दैन्यमित्येतैः संचारीभावैः परिपुष्टः अभिलाषविपप्रलम्भशृंगारः हृद्य एव । अत एव नृत्याभिनयस्य समीक्षणसन्दर्भे 'भावो भावं नुदति' इति परिव्राजिका वदति । अत्र अन्तर्निहितैः वचनैः सूचितार्थेन शृङ्गारस्य हृद्यत्वमधिकमे व वर्धितम् । तन्मयत्वं रसेषु इत्यत्र रसशब्दोऽपि 'भावना' इत्यास्मिन्नर्थे प्रयुक्तः नो चेत् किमर्थमत्र बहुवचनम् ।

आङ्गिकाभिनय त्रिविधः शारीरो मुखजस्तथा तथा चेष्टाकृतश्चैवशाखाङ्गोपाङ्गसंयुतः । अनेनशाखाभिनयेन मालविकया स्वानुरक्तिर्दर्शिता ।

रसेषु तन्मयत्वमिदं कालिदासेन विक्रमोर्वशीयम् नाटकेऽपि दर्शितम् । इन्द्रस्यादेशं प्राप्य ललिताभिनयार्थ स्वर्गं प्रति प्रस्थिता उर्वशी । तत्र सरस्वतीकृत लक्ष्मीस्वयंवरे उर्वशी तेषु तेषु रसेषु तन्मय्यासीत् ।[24] परं पुरूरवसि लग्नहृदया भावाभिनिविष्टा उर्वशी । तस्मिन् प्रसङ्गे पुरूषोत्तम इति भाणितव्ये पुरूरवसीति तस्याः मुखात् निर्गता वाणी । 'तेषु तेषु रसेषु तन्मय्यासीत् सा इत्यत्र' सञ्चारीभावाः एव अपेक्षिता इति दृश्यते । टीकायाम् एतस्य तन्मयीभवनस्य स्पष्टीकरणं दत्तमस्ति – 'रसान्तरेषु तत्तन्नटविशेषाभिनेय–वशादनुकूल– विभावानुभाव–व्यभिचारिसंयोगात्प्रादुर्भवत्सु शृंगारादिरसविशेषेषु । तन्मयी विगलितवेद्यान्तरा तदेकपरा । रसनिष्पात्तिसन्दर्भे तन्मयीभवनम् अत्यावश्यकम् ।

रसनिष्पत्तिविषये भट्टलोल्लरस्य उत्त्पात्तिवादः शङ्कुकस्य अनुमितिवादः भट्टनायकस्य भुक्तिवादः अर्भिनवगुप्तस्य च अभिव्यक्तिवादः प्रसिद्धः । भट्टलोल्लटेन अनुकार्यरामे रसः उत्पद्यते इत्युक्तम् । शङ्कुकेन कृत्रिमविभानुभावैः नटे अनुमीयमानः रसः इत्युक्तम् । भट्टनायकेन रसः न प्रतीये न उत्पद्यते नाभिव्यज्यते अपि तु भोगेन भुज्यते इत्युक्तम् । विभावानुभावैरभिव्यक्तः रसः सामाजिकेन आस्वाद्यते इति अभिनवगुप्तेन उक्तम् । उपर्युक्तेषु उदाहरणेषु रसेषु तन्मयीभवनत्व नटे एव उक्तम् कालिदासेन । वस्तुतस्तु एतद् तन्मयत्वम् त्रिषु स्थानेषु भवति । रचनाप्रसङ्गे कवौ अभिनयप्रसङ्गे नटे आस्वादप्रसेङ्ग सामाजिके च । एवं सूच्यार्थेन, भावाभिनयेन रसेषु तन्मयत्वेन रञ्जकता वर्धते इति कालिदास्य मतम् ।

परिपुष्टस्थायीभावः रसत्वेन आस्वाद्यते । इत्यास्मिन् सन्दर्भे कवेः तन्मयत्वम् कालिदासेन रघुवंशे रामायणजन्मकथासन्दर्भे उक्तम् –

निषादविद्धाण्डजदर्शनोत्थः श्लोकत्वमापद्यत यस्यशोकः ।

अत्र शोकः स्यायिभावः। क्रौञ्चवधप्रसङ्गे श्लोकरूपेण शापवाणी वाल्मीकेः मुखान्निर्गता । न लौकिकोऽयं शोकः। अभिनवगुप्तेन अस्य स्पष्टीकरणम् दत्तम् – न तु मुनेःशोक इति मन्तव्यम् । एवं हि सति तद्दुःखेन सोऽपि दुःखित इति कृत्वा रसस्य आत्मतेति निरवकाशं भवेत् । न च दुःखसन्तप्तस्यैषा दशा। एवं चर्वणोचित –शोकस्थायिभावात्मक–करुणरस–समुच्चलन– स्वभावत्वात्स एव काव्यस्यात्मा सारभूत–स्वभावोऽपरशब्दवैलक्षण्यकारकः।

वामनाचार्येण रीतिरात्मा काव्यस्येति प्रतिपाद्य गुणालङ्कारभेदः स्पष्टीकृतः। काव्यस्य कर्तारो धर्माः गुणाः तदतिशयहेतवस्त्वलङ्काराः। तेन दशशब्दगुणाः दश अर्थगुणाश्च प्रोक्ताः। वैदर्भीरीतिः सर्वश्रेष्ठा। रीतिरयं शब्दार्थवैमल्येन सरलावगम्या विरलसमासा चास्ति। सिद्धहस्तस्य शब्दप्रभोरपि कवेः काव्ये वैदर्भी विना वाङ्मधु न परिस्रवतीति तेन प्रतिपादितम् । उदाहरणरूपेण कालिदास्य श्लोकः उद्धृतः[25] – प्रसादगुणयुक्तवैदर्भीरीत्या कस्यापि रसस्य परिपोषः भवति। तेनैव सहृदयः सद्यः परनिर्वृतिं प्राप्य रसानन्दमनुभवति । वैदर्भमार्गोऽयं कालिदासेन शोधितः इति दण्डिनोक्तम् 'तेनेदं वर्त्म वैदर्भ कालिदासेन शोधितम् । आदर्शभूता वैदर्भी कालिदासेन प्रयुक्ता इति तस्य महत्त्वपूर्णं योगदानं काव्यशास्त्रस्य कृते वर्तते ।

वृत्तयोजनायां कालिदासस्य मन्दाक्रान्ता सर्वश्रेष्ठा इति क्षेमेन्द्रणोक्तम्।

सुवशा कालिदासस्य मन्दाक्रान्ता प्रवल्गति ।
सदश्व दमकस्येव काम्बोजतुरगाङ्गना ।।[26]

कीदृशमस्त्यादर्शभूतं मन्दाक्रान्तावृत्तम् –
मन्थराक्रान्त विश्रब्धैश्चतुर्भिः प्रथमाक्षरैः।
मध्यषट्केऽतिचतुरे मन्दाक्रान्ता विराजते। [27]

उदाहरणरूपेण मेघदूतस्य श्लोकाः दत्ताः। वृत्तस्यास्य विषये – मन्दाक्रान्ते सरसकविता कालिदासस्य काव्ये इति वक्तुं शक्यते ।

कालिदासेन नूतनाकाव्यपरम्परा निर्मिता। तस्य मेघदूतादनन्तरमेव दूतकाव्यपरम्परा प्रारब्धा। अनेकानि दूतकाव्यानि तदनन्तरं निर्मितानि। विश्वनाथेन खण्डकाव्यस्य लक्षणमपि मेघदूतस्याधारेण उक्तम्[28] आर्षमहा–काव्याभ्यामनन्तरं विदग्धमहाकाव्यस्य परम्परापि कालिदासेनैव निर्मिता। अत एव महाकाव्यलक्षणान्यपि कालिदासस्य महाकाव्ये दृष्ट्वैव दत्तानीति स्पष्टं ज्ञायते। 'एकवंशभवाः भूपाः कुलजाः बहवोऽपि वा'[29] इति विश्वनाथेन रघुवंशं दृष्ट्वैव उक्तम्। कुमारसम्भवस्य अष्टसर्गा एव कालिदासेन रचिता इति विद्वज्जनाः मन्यन्ते। अत एव 'नातिस्वल्पा नातिदीर्घाः सर्गा अष्टाधिका' इति लक्षणं कृतम्।[30]

रसगुणालङ्कारैः सह दोषचर्चाऽपि तस्य काव्यस्याधारेण कृता । मम्मटेन दोषविवरणप्रसङ्गे दोषनिवारणप्रसङ्गे च कालिदासस्य काव्यादुदाहरणानि–चितानि । भामहादारभ्य रसवदलङ्कारस्य स्वरूपं परिवर्तितं परं सर्वत्र उदाहरणानि कालिदासस्यैव दृश्यन्ते।

एवं कालिदासस्य काव्यग्रन्थैः न केवलं साहित्यपरम्पराः निर्मिताः अपि तु तस्य काव्यग्रन्थानामाधारेण काव्यविद्भिः लक्षणान्यपि कृतानि । काव्ये काव्यशास्त्रे च एतदेव तस्य महत्त्वपूर्ण योगदानम् । तस्य प्रसादगुणयुक्ता वैदर्भीरीतिः रसाभिव्यञ्जकाऽलङ्कारयोजना रसाक्षिप्ता च वाणी काव्यग्रंथानां कृते लक्षणग्रन्थानां कृतेऽपि आदर्शभूता अववत् ।

– संदर्भसूचिः –

1. काव्यालङ्कारः 1.7
2. नाट्यशास्त्रम्–भरतः, संपा. पारसनाथ द्विवेदी प्रस्तावना
3. कालिदासाच्या नाटकांमधील नाट्यशास्त्रीय उल्लेखांचा परामर्श पृ. 3 ते 233
4. रघुवंशम् 1.1
5. सौन्दर्यलहरी–1
6. काव्यालंकार – 1
7. वक्रोक्तिजीवितम्
8. कुमार 1.28
9. ईशा 8 (यजु. 40.8)

10. रघुवंशम् 10/36, 37
11. कुमार 2.17
12. रघु. 1.59
13. ध्वन्यालोक 2.16
14. अभि. शाकुन्तलम् 1.23
15. कुमार – 1.49
16. रघु. 6.65
17. नाट्यशास्त्र – अ. 6
18. ना.श. 7.2
19. ना.शा. 7.5
20. विक्रम 4–9,
21. मालविका 3.3
22. माल. 2.8
23. मालविका 2.4
24. विक्रम–3
25. शाकु. 2.6
26. सुवृत्ततिलक 3.34
27. सुवृत्ततिलक 2.34
28. साहित्यदर्पण 6.229
29. साहित्यदर्पण 6.316
30. साहित्यदर्पण 6.320

सन्दर्भग्रन्थसूचिः

1. कालिदास के काव्य में सादृश्येतर अलङ्कार – डॉ. विष्णुराम नागर
संपा. डॉ. सूर्यप्रकाश व्यास प्रशांत प्रकाशन, वाराणसी, प्रथम 1995
2. कालिदास परिशीलन संपा. राधावल्लभ त्रिपाठी
संस्कृत परिषद्, संस्कृत विभाग, डॉ. हरिसिंह गौर विश्वविद्यालय, प्रथम 1988
3. The Mahavikagnimitram of Kalidas, K.A.Subramania (London).
Dr. S. Radhakrishna साहित्य अकादमी दिल्ली, First 1978

---------- ௐ♦ௐ ----------

वैदिकचिन्तनम् कालिदाससाहित्ये

डॉ. सी. जी. विजयकुमार

---------- ௐ♦ௐ ----------

प्राचीन कालादारभ्य आर्वाचीन कालपर्यन्तं एतस्याः भारतीय संस्कृतेः तथा कोटिशःजनानां च मार्गदर्शकाः आसन् वेदाः। ते सनातनधर्मस्य मूलाधाराः सन्ति। भारतीयधर्मे या जीवनीयशक्तिः दृश्यते तस्याः मूलकारणं वेदाः एव। वेदाः अक्षयविचाराणां महता प्रवाहेण या भारतीयविचारधारा वर्तते तस्याः निरन्तरस्थित्यै महदुपकारकाः भूत्वा परिलसन्ति। तेषु वेदेषु ये विचाराः आगताः ते निरन्तरं तदनन्तरकालेऽपि भिन्न भिन्न साहित्यरूपेण प्रचलिताः भवन्ति। रामायणे वा भवतु महाभारते वा भवतु वैदिकसंस्कृतेः अनुवर्तनं प्रभावश्च द्रष्टुं शक्नुवन्ति।

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।
बिभेत्यल्पश्रुतात् वेदो मामयं प्रहरिष्यति।।
(म.भा.आ.प. 1/25)

एतस्य ईश्वरीयज्ञानस्य वैशिष्ट्यं नाम मानवसृष्टेः आरम्भतः एव ज्ञानस्य अविर्भावः अभवत्। अत्र मनुष्येतिहासस्य विवरणम् अकृत्वा सृष्टिविज्ञान–सम्बन्धिसत्यस्य प्रतिपादनम्, प्रपञ्चरहस्यानां तथा गुणानां च प्रकाशकत्वं दृश्यते। विवेकपूर्णज्ञानपूरिताः वेदाः विरोधाभासात् मुक्ताः च सन्ति। तस्मात् एतत् वैदिकचिन्तनं भारतीयसंस्कृतेः मूलाधारः अभवत्। याज्ञिककार्याणां रूपेण वा, वेदान्तविचाररूपेण वा, षोडशसंस्काररूपेण वा, सामाजिक रूपेण वा निरन्तरं एषा संस्कृतिः, चिन्तनधारा च सुदृढा भूत्वा निरन्तरं प्रवहति। तादृशानां विचाराणां प्रभावः अग्रिमकाले साहित्यग्रन्थेषु अपि दृश्यते। प्रचलितानां संस्कृतीनां संस्काराणां प्रभावः कवीणां रचनासन्दर्भे भवति इति निर्विवाद एव। तर्हि एतानां विचाराणां प्रतिफलनं कालिदाससाहित्ये कथं दृश्यते इति विचारः क्रियते **वैदिकचिन्तनम् कालिदाससाहित्ये** इत्यस्मिन् निबन्धे।

यद्यपि वेदकालस्य तथा कविसार्वभौमस्य कालिदासस्य काले महदन्तरं वर्तते तथापि वैदिकजीवनस्य प्रभावः सुदृढरूपेण कालिदाससाहित्ये द्रष्टुं शक्यते। रघुवंशस्य प्रथमसर्गे रघुकुलगुणवर्णनसमये एव एषः विचारः दरीदृश्यते

सोऽहमाजन्मशुद्धानामाफलोदयकर्मणाम्।
आसमुद्रक्षितीशानामानाकरथवर्त्मनाम्।।

यथाविधिहुताग्नीनां यथाकामार्चितार्थिनाम्।
यथापराधदण्डानां यथाकालप्रबोधिनाम् ।।

त्यागाय संभृतार्थानां सत्याय मितभाषिणाम्।
यशसे विजिगीषूणां प्रजायै गृहमेधिनाम्।।

शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्।
वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्।। 5.1 (र. वं 1–5–8)

रघुपरम्परावर्णनरूपेण अत्र जीवनस्य साफल्यं कुत्र इति प्रतिपादयति कालिदासः। तत्र यज्ञस्य महत्त्वम्, त्यागस्य माहात्म्यम्, सत्यस्य भूमिका (सत्यं वद धर्मं चर) इत्यादि वैदिकसंस्काराः परमगुणरूपेण कथयति। अपि च वेदोक्त आश्रमव्यवस्थायाः अपि वर्णनम् अत्र दृश्यते।

ग्रामेष्वात्मविसृष्टेषु यूपचिह्ननेषु यज्वनाम्
अमोघाः प्रतिगृह्नान्तावर्घ्या नुपदमाशिषः। 2.1 (44)

अत्रापि राज्ञा यस्मिन् यस्मिन् ग्रामे यज्ञाः प्रवृत्ताः तेभ्यः यूपदानस्य तेषां चिह्नानां च विवरणात् यज्ञक्रियाणां प्राचुर्यं दृश्यते।

तस्याः खुरन्यासपवित्रपांसुरपांसुलानां धुरि कीर्तनीया
मार्गं मनुष्येश्वरधर्मपन्ती श्रुतेरिवार्थं स्मृतिरन्वगच्छत्।। रघु. 2 (2)

इत्यस्मिन्श्लोके "श्रुतेरिवार्थं स्मृतिरन्वगच्छत्" इति उपमया श्रुतेः तुल्यमेवासीत् स्मृतिग्रन्थाः, तथा विचाराः इति उपस्थाप्य स्मृतयः कथं श्रुतिमनुसरन्ति इति दर्शयति।

कालिदासः त्रिषु नाटकेष्वपि नान्दीश्लोकैः वेदान्तप्रातिपादितस्य ईश्वरस्य महत्त्वं प्रतिपादयति।

एकैश्वर्ये स्थितोऽपि प्रणतबहुफले यः स्वयं कृत्तिवासाः
कान्तासंमिश्रदेहोऽप्यविषयमनसां यः परस्ताद् यतीनाम्।

अष्टाभिर्यस्य कृत्स्नं जगदपि तनुभिर्बिभ्रतो नाभिमानः।
सन्मार्गालोकनाय व्यपनयतु स वस्तामसीं वृत्तिमीशः।

मालविकाग्निमित्रम्–1

अभिज्ञानशाकुन्तले –

या सुष्टिः सृष्टुराद्या वहति विधिहुतं या हविः या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणाः या स्थिता व्याप्य विश्वम्।
या माहुः सर्वभूत प्रकृतिरिति यथा प्राणिनः प्राणवन्तः
प्रत्यक्षाभि प्रपन्नस्तनुभिखतु वस्ताभिरष्टाभिरीशः।।

इत्यास्मिन् नान्दीश्लोके तस्यैव एकस्य ईश्वरस्य अष्टविधदृश्यशरीरस्य विवरणं करोति कालिदासः।

वेदान्तेषु यमाहुरेकपुरुषं व्याप्य स्थितं रोदसी
यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थोक्षरः।
अन्तर्यश्च मुमुक्षिभिर्नियमित प्राणादिर्भिर्मृग्यते
स स्थाणुः स्थिरभक्तियोगसुलभो निश्रेयसायास्तु वः।।

इत्यस्मिन् विक्रमोर्वशीय नान्दीश्लोके वेदान्तचिन्तनं स्पष्टं दृश्यते ।

कालिदासः एतेषु श्लोकेषु विष्णोः, शिवस्य, ब्रह्मणः च वर्णनं चकार तथापि एतत्सर्वं एकस्यैव मूर्तिभेदः इति कुमारसम्भवे प्रतिपादयति।

एकैव मूर्तिर्बिभिदे त्रिधा सा सामान्यमेषां प्रथमावरत्वम्।
विष्णोर्हरः तस्य हरिः कदाचिद्वेधास्तयोस्तावपि धातुराद्यौ। KS VII 44

एकः एव पुरुषः भिन्नमूर्तरूपेण दृश्यते इति चिन्तनं चेतनाचेतनप्रपञ्चस्थः परमात्मनः एव शरीरम् इति बृहदारण्यकोपनिषद्विचारः एव। बृहदारण्यकोपनिषदि तृतीयाध्याये सप्तमब्राह्मणे तृतीये खण्डे 23 मन्त्रैः एतद् प्रतिपादितम्। विशेषतया 22 तममन्त्रः –

यो विज्ञाने तिष्ठन् विज्ञानादन्तरो यं विज्ञानं न वेद यस्य विज्ञानं शरीरं यो विज्ञानमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः। (22)

वेदान्तेषु यमाहुरेकपुरुषं व्याप्य स्थितं रोदसी इति प्रथमा पंक्तिः – तत्रत्य 'पुरुषः' इति प्रयोगः (पुरि शेते) इत्यर्थे अतीवयोग्यं भासते। एतद् नारायणोपनिषदः(VI II) 'अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थित' इति मतं स्मारयति। तत्रैव **'अन्तर्यश्च मुमुक्षुभिःनियमित प्राणादिभिर्मृग्यते** इति तृतीयापङ्क्तिः महानारायणोपनिषदः (XII 16) मन्त्रस्य प्रतिफलनमिव दृश्यते –

दह्वं विपापं वरवेश्मभूतं यत्पुण्डरीकं पुरमध्यसंस्थम्।
तत्रापि दहनं गहनं विशोकं तस्मिन् यदन्तस्तदुपासितव्यम्।।

एषः एव विचारः कुमारसम्भवे तृतीये सर्गे दृश्यते।
मनो नवद्वारनिषिद्धवृत्ति हृदि व्यवस्थाप्य समाधिवश्यम्

यमक्षरं क्षेत्रविदो विदुस्तमानमात्मन्यवलोकयन्तम्।।

(III 50)

चतुर्था पङ्क्तिः – **स स्थाणुस्थिर भक्तियोगसुलभो निश्रेयसायास्तु वः** एषः एव विचारः भगवद्गीतायां 11–54–श्लोके यथा –

भक्त्या तु अनन्यया शक्त्या अहमेवंविधोऽर्जुन।

रघुवंशस्य दशमसर्गे –

प्रणिपत्य सुरास्तस्मै शमयित्रे सुरद्विषाम्।
अथैनं तुष्टुवुः स्तुत्यवाङ्मनसगोचरम्।। 10/15

एतस्मिन् श्लोके 'न वाग्गच्छति न मनः (11.4.1) इति केनोपनिषद्मन्त्रस्य तथा "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" इति तैत्तिरीयमन्त्रस्य च सारांशं द्रष्टुं शक्नुमः।

नमो विश्वसृजे पूर्वं विश्वं तदनु बिभ्रते।
अथ विश्वस्य संहर्त्रे तुभ्यं त्रेधा स्थितात्मने।। 10/16

तैत्तिरीयमन्त्रं पश्यामः (III-1.1) यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति, यत्प्रयन्त्याभिसंविशन्ति, तद्विजिज्ञासस्व" इति मन्त्रेण समं दृश्यते। रघुवंशे 10 सर्गे 20 श्लोके कालिदासस्य वैदिकचिन्तनं महद्रुपेण द्रष्टुं शक्तुमः।

सर्वज्ञस्त्वमविज्ञातस्सर्वयोनिस्त्वमात्मभूः
सर्वप्रभुरनीशस्त्वमेकस्त्वं सर्वरूपभाक्।

सर्वज्ञः – एष सर्वेश्वर एषः सर्वज्ञः (माण्डूक्य –6)

सर्वयोनिः – यतो वा इमानि भूतानि जायन्ते (तैत्तिरीय III-1.1)

आत्मभूः – तदात्मानं स्वर्गकुरूत (idid T1.7.1)

अनीशः – न तस्य कश्चित्पतिरस्ति लोके न चेशिरे (श्वेताश्वेतरे VI 9)

सर्वरूपभाक् – ब्रह्मैतद्धि सर्वाणि रूपाणि बिभर्ति। (Bruhadai I.b.2)

तत्रैव रघुवंशे अपरःश्लोकः –

अभ्यासनिगृहीतेन मनसा हृदयाश्रयम्।
ज्योतिर्मयं विचिन्वन्ति योगिनस्त्वां विमुक्तये।। 10.23

एतस्मिन्श्लोके – अङ्गुष्ठमात्रः पुरुषं ज्योतिरिवाधूमकः (केनोपनिषद पृ. 13) अन्तः शरीरे ज्योतिर्मयो हि शुभ्रो यं पश्यन्ति यतयः क्षीणदोषाः (मुण्डकोपनिषत् III 5) इत्येतस्य मन्त्रस्य आशयानां प्राचुर्यं स्पष्टं दृश्यते।

''पुरुषसूक्तस्य 'अजायमानो बहुधा विजायते'' इति मन्त्रस्य अनुसरणं''

अजस्य गृह्णतो जन्म निरीहस्य हतद्विषः।।
स्वपतो जागरूकस्य याथार्थ्यं वेद कस्तव।। 10–24

इत्यस्मिन्श्लोके भासते। कालिदाससस्य पूर्वोक्तविचारे श्रुतिप्रोक्त–चतुर्विधपुरुषार्थानाम् (धर्म–अर्थ–काम–मोक्ष) अपि वर्णनं दृश्यते। यत्र यत्र अध्यात्मविद्या साहित्ये योजनीया इति विषये महाकवेः नैपुण्यं स्पष्टं विलसति अत्र। ये स्वरचनां पठन्ति ते निश्चयेन नवरसेन प्राप्यमाणं ब्रह्मानन्दसहोदरं काव्यानन्दं प्राप्य तेन सह ब्रह्मानन्दप्राप्त्युपायानामपि ज्ञानं प्राप्नुयुः इति विचाराधारेण एव एतादृशानां विषयाणां विवरणम् अत्र आविष्कृतम्।

कालिदाससाहित्ये आध्यात्मिकविषये एव वैदिकचिन्तनम् आगतम् इति न। ''अहो उदाररमणीया पृथिवी'' इति नायक–वाक्येन तस्य स्वचर्यावरणेन सह कथं वर्तितव्यम् इति स्रौतविचाराणामेव विवरणम् अस्ति। पृथ्वीसूक्ते वर्णितानां पृथ्वीसम्बन्धिविचाराणाम् उल्लेखः बहुषु स्थानेषु उपलभ्यते। सनातनधर्मे कदापि पृथ्वी तथा ईश्वरः एतौ परस्परं भिन्नौ इति विचारः नासीत्। कालिदासः तेषां विचाराणाम् अनुगामी भूत्वा हिमालयस्य वर्णने स्पष्टीकरोति।

अस्त्युत्तरस्यां दिशि देवतात्मा।
हिमालयो नाम नगाधिराजः।।

हिमालयः केवलम् एकः पर्वतः नास्ति कालिदासाय, परन्तु ईश्वरतुल्यः।

दिवं यदि प्रार्थयसे वृथा श्रमः
पितुः प्रदेशास्तव देवभूमयः।। (KS V 45)

जङ्गमं प्रैष्यभावे वः स्थावरं चरणाङ्कितम्
विभक्तानुग्रहं मन्ये द्विरूपमपि मे वपुः।। (VI 58)

अत्र उभयथा अपि, शरीररूपेण पर्वतरूपेण च वर्णनमस्ति। प्रसिद्ध–गायत्रीमन्त्रस्य ''धियो यो नः प्रचोदयात्''इति पङ्क्तिं स्मृत्वा रघुवंशस्य पञ्चमसर्गे

वयं तमेव विचारं भिन्नशब्दैः पश्यामः।

अप्यग्रणीर्मन्त्रकृतामृषीणां कुशाग्रबुद्धे कुशली गुरुस्ते।
यतस्त्वया ज्ञानमशेषमाप्तं लोकेन चैतन्यमिवोष्णरश्मेः।। (RV 5&4)

अभिज्ञानशाकुन्तले चतुर्थाङ्के शकुन्तलायाः आश्रमलतानां, तथा वृक्षाणां, प्राणिनामुपरि यः स्नेहः स तु पूर्णरूपेण वेदे प्रतिपादितानां पर्यावरणचिन्तनानां प्रभावः एव। माता त्वम् पुत्रोऽहम् पृथिव्याः' इत्यादि मन्त्राणां यः सन्देशः स एव भिन्नरूपेण' कण्डूयमानेन कटं कदाचित्' इति रघुवंशे ''वा हला शकुन्तले त्वत्तोऽपि तातकश्यपस्य आश्रमवृक्षाः प्रियतराः'' इति तर्कयामि इति प्रियंवदावचने तथा 'सखि अनसूये न केवलं तातनियोग एव, अस्ति मे सोदरस्नेह एतेषु' इति शकुन्तलावचने वा प्रतिस्फुरति। विक्रमोर्वशीये गृध्रमारणसन्दर्भोऽपि एवमेव।

सनातनधर्मसंस्कृतौ महत्त्वपूर्णः भागः अस्ति षोडशसंस्काराः। कस्यापि वा जीवने एते अविभाज्यविषयाः। एतेषां संस्काराणामपि आविर्भावः वैदिकचिन्तनात् एव। तेषां विषये अपि कालिदासे साहित्ये भिन्न विभिन्नसन्दर्भेषु उल्लेखः अस्ति एव। एते गृह्यसूत्रादिविषयाः, जीवनसम्प्रदायश्च कालिदाससाहित्ये प्रतिबिम्बितमस्ति। अग्निदेवतायाः तत्सम्बन्धिः यज्ञस्य च वैशिष्ट्यं वसिष्ठ–दिलीपयोः संवादसन्दर्भे रघुवंशे इत्थं दृश्यते –

हविरावर्जितं होतस्त्वया विधिवदग्निषु।
वृष्टिर्भवति सस्यानामवग्रहविशोषिणाम्।।

पुरुषायुषजीविन्यो निरातङ्का निरीतयः।
यन्मदीया प्रजास्तस्य हेतुस्त्वब्द्रह्मवर्चसम्।।

रघुवंशः – 1/62–63

रघुवंशस्य दशमे सर्गे –

कुमाराः कृतसंस्काराः ते धात्रीस्तन्यपायिनः।
आनन्देनाग्रजेनेव समं ववृधिरे पितुः।।

स्वाभाविकं विनीतत्वं तेषां विनयकर्मणा
मुमूर्छ सहजं तेजो हविषेव हविर्भुजाम् ।। (RV X 78-79)

मनुस्मृतौ वा याज्ञवल्कस्मृतौ वा संस्काराणां महत्त्वम् एवं प्रतिपाद्यते

"निषेकादिःश्मशानान्तो मन्त्रैर्यस्योदितो विधिः।" एतस्मिन् निषेकविषये (गर्भाधानम्) कुमारसम्भवे इन्द्रः कामदेवं प्रति वदति।–

तस्मै हिमाद्रेः प्रयतां तनूजां यतात्मने रोचयितुं यतस्व।
योषित्सु तद्वीर्यनिषेकभूमिः सैव क्षमेत्यात्मभुवोपदिष्टम्।।
(कु.सं. 3/16)

स्पष्टं वर्तते । एवमेव रघुवंशे –

नरपतिकुलभूत्यै गर्भमाधत्त राज्ञी
गुरुभिरनिविष्टं लोकपालानुभावैः। (RV II 75)
इत्यत्रापि गर्भाधानसंस्कारविषये सूचनाः सन्ति।

रघुवंशस्य तृतीयसर्गे दशमश्लोके "पुंसवनं" इति (पुमानं सूयते अनेन इति पुंसवनम्) नाम स्वीकृत्यैव विवृतम्।

यथाक्रमं पुंसवनादिकाः क्रियाः
घृतेश्च धीरः सदृशीर्व्यधत्त सः।। (RV III 10)

"प्राङ्नाभिरवर्धनात् पुंसो जातकर्म विधीयते।" इति मनुस्मृतै निर्देशः। रघुवंशस्य तृतीयसर्गे 18 श्लोकं पठामः।

स जातकर्मण्यखिले तपस्विना तपोवनादेत्य पुरोधसा कृते।
दिलीपसूनुर्मणिराकरोद्भवः प्रयुक्तसंस्कार इवाधिकं बभौ।।

नामकरणम् चौलम् विद्यारम्भः, उपनयनम् केशान्तः समावर्तनं विवाहः इत्यादि सर्वेषामपि संस्काराणाम् उल्लेखः कालिदाससाहित्ये उपलभ्यते। विवाहसम्बधिप्रसङ्गेषु विभिन्नसम्प्रदायानाम अपि उल्लेखः दरीदृश्यते।

यथा मनुस्मृतौ –

ब्रह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः।
गन्धर्वो राक्षसश्चैव पैशाचस्त्वषृमोऽधमः।।

अभिज्ञानशाकुन्तले दुष्यन्तशकुन्तलयोः विवाहः
गान्धर्वेण विवाहेन बह्व्यो राजर्षिकन्यकाः।
श्रूयन्ते परिणीतास्ताः पितृभिश्चाभिनन्दिताः।।
(अ.शा. 3/20)

कुमारसंभवे विवाहसंबन्धिनः एकैकांशस्यापि वर्णनं क्रियते कालिदासेन।

अन्य विश्वात्मने गौरी संदिदेश मिथः सखीम्।
दाता मे भूभृतां नाथः प्रमाणीक्रियतामिति।।

पत्नीविषये –

क्रियाणां खलु धर्म्याणां सत्पत्न्यो मूलकारणम्।। (KS VI 13)
गृहस्थाश्रमस्य महत्त्वं तु स्मृतिग्रन्थेषु प्रत्यपादि। यथा मनुस्मृतौ।

यथा वायुं समाश्रित्य वर्तन्ते सर्वजन्तवः।
तथा गृहस्थमाश्रित्य वर्तन्ते सर्व आश्रमाः।। (MS III 87)

रघुवंशे पञ्चमे सर्गे दृश्यताम् –

अपि प्रसन्नेन महर्षिणा त्वं सम्यग्विनीयानुमतो गृहाय।
कालो ह्ययं संक्रमितुं द्वितीयं सर्वोपकारक्षममाश्रमं ते।।

दाम्पत्यसंकल्पः तु रघुवंशस्य प्रथमश्लोकादेव उपलभ्यते–
वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ।। इति।

आयुषि आश्रमाणां विषये यथा स्मृतिषु ब्रह्मचर्याश्रमं समाप्य गृही भवेत् गृही भूत्वा वनी भवेत्, वनी भूत्वा प्रव्रजेत्। इति परम्परां रघुवंशे दर्शयति ।अजस्य

राज्याभिषेकं कृत्वा रघुः वानप्रस्थं स्वीकरोति।

तमरण्यसमाश्रयोन्मुखं शिरसा वेषेन शोभिता सुतः ।।रघु. VIII-12

मरणसन्दर्भेऽपि –

सर्वसङ्ग्निवृत्तस्य ध्यानयोगरतस्य च।
न तस्य दहनं कार्यं नैव पिण्डोदकक्रिया : ।।रघु 8/25

रघुः सन्यासी भवति । तस्य देहावसाने अजः तद्वदेव कृतवान् ।

श्रुतदेहविसर्जनः पितुश्चिरमश्रूणि विमुच्य राघवः ।
विदधे विधिमस्य नैष्टिकं यतिभिः सार्धमनग्निमाग्निचित् ।।

पिण्डोदकविषयेऽपि –

चिरपुरातनभारतीयसंस्कृतेः अनुयायी अभिमानी च आसीत् कालिदासः। स्वसाहित्यरचनासन्दर्भेऽपि यथा यथा अनौचित्यं विना स्वधार्मिकचिन्तनस्य उल्लेखाय महाकविः न व्यस्मरत् । कविकुलगुरोः वेदान्तज्ञानम्, चतुर्विध–पुरुषार्थमूलकजीवनव्यवस्था, स्ववातावरणेन कथं वर्तितव्यम् इत्यादि महत्त्वपूर्णम् अस्ति।

अतः वयं तस्य अप्रतिमप्रतिभाविलासस्य पुरतः नमस्कुर्मः। अभिज्ञान–शाकुन्तलस्य भरतवाक्येन एवं निबन्धम् उपसंहरामि।

प्रवर्ततां प्रकृतिहिताय पार्थिवः सरस्वती श्रुतिमहतां महीयसाम्।
ममापि च क्षपयतु नीललोहितः पुनर्भवं परिगतशक्तिरात्मभूः।।

---------- ◆ ----------

त्रिस्कन्धज्योतिर्विद्–महाकवि –कालिदासः

डॉ. कृष्णकुमारपाण्डेयः

---------- ◆ ----------

कविकुलगुरूमहाकविकालिदासस्य कविताकामिनी रसोपेतमाधुरीं आदाय सहृदयानां पुरस्सरं शब्दमयनूपुरझंकारैः अलौकिकाह्लादं उपस्थापयति, अत्र न काचित् संशीतिः। कविकुलश्रेष्ठकालिदासस्य काव्यानां, नाटकानां चाध्ययनेन ज्ञायते, यदस्य ग्रन्थेषु विविध शास्त्राणां शास्त्रतत्त्वानि सर्वत्र विकीर्णानि वर्तन्ते। सर्वशास्त्रेषु ज्योतिषशास्त्रस्य कालशास्त्ररूपेण परिगणनमस्ति। तत्र सूक्ष्मातिसूक्ष्मावयवादारभ्यातिपरिमाणं कालं यावत् चर्चा समुद्घाटिता वर्तते । अतः कालविधानशास्त्रं ज्योतिषम् इति नाम्ना प्रसिद्धम् ।

"वेदास्तावत् यज्ञकर्म प्रवृत्ताः
यज्ञाः प्रोक्तास्ते तु कालाश्रयेण ।
शास्त्रादस्मात् कालबोधोयतः स्यात्
वेदाङ्गत्वं ज्योतिषस्योक्तमस्मात् ।।"[1]

परम्परागतभारतीयविद्यानान्तर्गत–गणित–खगोल–विज्ञानस्य चिन्तनं प्राचीनकालादेव प्रवर्तते। लगध–आर्यभट्ट–भास्कर–ब्रह्मगुप्त–वराहमिहिर–प्रभृतयो विद्वांस आकाशे विचरतां ग्रहनक्षत्रादीनां गतिस्थितिज्ञानं प्रकटीकृतम्। वासनावार्तिककारैः नृसिंहदैवज्ञेन उक्तम् –

"ज्योतींषि ग्रहनक्षत्राण्याधिकृत्य कृतो ग्रन्थो ज्योतिषम्।"[2]

ज्योतिषशास्त्रे प्राचीनकालतः सिद्धान्त–संहिता–होरात्मकं स्कन्धत्रयं भिन्नमुपस्थापितम् आचार्यैः। कविकालिदासस्य साहित्ये ज्योतिर्विज्ञान–विषयाधारित विचारास्तत्काव्यनाटकोपलब्धसामग्रीभिः निम्नरूपेण विवरणं कर्तुं शक्यन्ते।

अ. सिद्धान्तज्योतिषम् –

महाकविकालिदासेन स्वकीयकाव्येषु नक्षत्रसम्बन्धिविचारः वर्णितः। रघुवंशे प्रथमसर्गे लिखितमस्ति ।

"काऽप्यभिख्या तयोरासीद् व्रजतोः शुद्धवेषयोः।
हिमनिर्मुक्तयोर्योगे चित्राचन्द्रमसोरिव।।"[3]

अस्मिन्श्लोके गुरूं वशिष्ठं प्रतिगच्छतोः सुदक्षिणादिलीपयोर–निर्वचनीयशोभा तथैवासीद् यथा तुषारनिर्मुक्तयोश्चित्राचन्द्रयोः सुषमा जायते । ज्योतिषशास्त्रसिद्धान्तानुसारं चैत्रमासे वसन्तागमनत्वात् पूर्णिमायां चित्रानक्षत्रे यदाचन्द्रमास्तिष्ठति तदा तुषारपातो न भवति ।

रघुवंशे अष्टादशसर्गेऽपि वर्णितम् –

"तस्य प्रभानिर्जितपुष्परागं पौष्यां तिथौ पुष्यमसूत पत्नी।"

अत्र पुष्येण युक्तस्य कालस्य पौषमासस्योल्लेखः कृतोऽस्ति। सूर्यसिद्धान्ते मानाध्याये द्वादशमासनामविधानमुल्लिखितमस्ति।

"भचक्रभ्रमणं नित्यं नाक्षत्रं दिनमुच्यते ।
नक्षत्रनाम्ना मासास्तु ज्ञेयाः पर्वान्तयोगतः ।।
कार्तिक्यादिषु संयोगे कृत्तिकादि द्वयन्द्वयम् ।।"[4]

चैत्रादि द्वादशमासनामानि नक्षत्रनाम्नैव प्रसिद्धानि। महाकविकालिदासः कालविधायकखगोलीयं रहस्यम् 'प्रतिमासस्य पूर्णिमायां कस्मिन्नक्षत्रे चन्द्रमातिष्ठति इति' जानाति स्म। खगोले भचक्रे सप्तविंशतिनक्षत्राणि सन्ति। तत्र मासनामकालमानञ्च सूर्यचन्द्रयोः गत्याधारेण निश्चीयते।अतएव गणितज्ञानं बिना एतत्सर्वं नैवशक्यम्। इत्थमेव कुमारसम्भवग्रन्थे पार्वत्या विवाहकाले उत्तरफाल्गुनि नक्षत्रमासीत्। मुहूर्तदृष्ट्या विवाहनक्षत्रोल्लेखः कृतः।

"मैत्रे मुहूर्ते शशलाञ्छनेन योगं गतास्तूत्तरफाल्गुनीषु।"[5]

कविकुलगुरुकालिदासो नक्षत्राणां तारासंख्यामपि जानाति। यथा रघुवंशे एकादशसर्गे निम्नश्लोकद्वारे स्पष्टतया प्रतिभाति ।

"तौ विदेहनगरीनिवासिनां गां गताविव दिवः पुनर्वसू।
मन्यते स्म पिबतां विलोचनैः पक्ष्मपातमपि वञ्चनां मनः।।"[6]

पुनर्वसुनक्षत्रस्य तारकाद्वयमिव स्वर्गात् पृथिवीमागतौ रामलक्ष्मणौ पश्यतां मिथिलानिवासिनां मनांसि नेत्रपक्ष्मपतनमपि सोढुं न शेकुः। श्लोकेऽस्मिन् पुनर्वसुनक्षत्रस्य द्विवचने प्रयोगः तारकाद्वयं सूचयति। ज्योतिषे पाराशरादि प्राचीनगणका पुनर्वसुनक्षत्रे द्वे तारेऽमन्यन्त। अभिज्ञानशाकुन्तले तृतीयाङ्के दुष्यन्तः कथयति ।

"किमत्र चित्रं यदि विशाखे शशांकलेखामनुवर्तेते।"[7]

अत्र विशाखानक्षत्रस्य तारकाविषयः वर्णितः। महाकविकालिदासेनात्र नक्षत्रतारकासंख्यादि सम्बन्धियज्ज्ञानं परिचयं प्रदर्शितं तद् आचार्य वराहमिहिरात् प्राचीनमेव भवितुं शक्यते। प्राचीनकालादेव ज्योतिर्विज्ञाने सिद्धान्तमस्ति 'चन्द्रः सूर्यप्रकाशादेव प्रकाशितो भवति 'इति । महाकविकालिदासोऽपि सिद्धान्तममुं जानाति स्म इति कालिदासग्रन्थविषयाधारेण प्रमाणितम्। तेन रघुविषये रघुवंशे तृतीयसर्गे लिखितम्–

"पितुः प्रयत्नात्स समग्रसम्पदः शुभैः शरीरावयवैर्दिने दिने ।
पुपोष वृद्धिं हरिदश्वदीधितेरनुप्रवेशादिव बालचन्द्रमाः।।"[8]

रघुः पितुर्दिलीपस्योचिताहारादिप्रयासैः प्रतिदिनं शरीरावयवैर्वृद्धिं प्राप, यथा सूर्यरश्मयो बालचन्द्रमसि (शुक्लप्रतिपद्चन्द्रः) प्रविश्य नित्यमेव चन्द्रं प्रवर्धयन्ति। कुमारसम्भवेऽपि लिखितम् –

"करेण भानौर्बहुलावसाने सन्धुक्षमाणेव शशांकलेखा।"[9]

ज्योतिषग्रंथबृहत्संहितायां वर्णनमस्ति –

"सलिलमये शशिनि रवेर्दीधितयो मूर्च्छितास्तमोनैशम् ।
क्षपयन्ति दर्पणोदरनिहिता इव मन्दिरस्यान्तः ।।
त्यजतोऽर्कतलं शशिनः पश्चादवलम्बते यथा शौक्ल्यम् ।
दिनकरवशात्तथेन्दोः प्रकाशतेऽधः प्रभृत्युदयः ।।"[10]

श्लोकेऽस्मिन् आचार्यवराहमिहिरेण कथितः यत् सूर्यस्य रश्मयो जलमये चन्द्रमसि प्रतिबिम्बिता रात्रेस्तमोपहरन्ति यथा प्रसादेषु दर्पणमयगवाक्षेभ्यो दीपप्रकाशोः वहिः प्रतिबिम्बितो भवति। सूर्यकिरणैश्चन्द्रमासः प्रकाशनसिद्धान्तोऽपि वर्णितः। तेनोक्तं यत् सूर्यतलं त्यजतश्चन्द्रस्य यथा पश्चात् भागो भजते शौक्ल्यं तथैव सूर्यकिरणैश्चन्द्रस्याधः प्रभृत्युपरिभागः प्रकाशते। चन्द्रो भुवमभितो भ्रमणं प्रायः सार्द्धैकोनत्रिंशत् 29½ दिनेषु करोति, परन्तु चन्द्रः प्रकाशहीना पिण्डत्वाद्, न भाति निजभास्वरत्वेन, ये च रजनीकररश्मयः कथ्यन्ते ते केवलं चन्द्रे पतित्वा ततः परावृत्ताः सूर्यरश्मयः एव। अतएव भास्वरत्व–विहिनत्वाच्चन्द्रस्तदैव दृश्यते यदा तस्य प्रकाशितगोलार्द्धः पूर्णतोऽथवांशतोऽस्माकं सम्मुखे आगच्छति। प्रकाशितगोलार्द्धोऽयं भुवं परितश्चन्द्रस्य भ्रमणशीलत्वाद् विभिन्नेषु इनान्तरेषु विभिन्नमात्रया अवलोक्यते कदाचित् पूर्णतया सम्मुखे आयाति कदाचिदर्द्धतया कदाचिच्च पूर्णतया तिरोहितो भवति। एवं प्रकाशितगोलार्द्धस्य विभिन्नदर्शनेभ्यश्चन्द्रस्य कलासु क्षयवृद्धी भवतः। अनेन विवरणेन स्पष्टतया ज्ञायते यत् कालिदासस्य साहित्ये ज्योतिर्विज्ञानस्य "सूर्यरश्मिभिश्चन्द्रः प्रकाशते" सार्वकालिक निर्विवादसिद्धान्तोऽयं सुष्ठुरूपेण प्रतिपादितोऽस्ति।

रघुवंशे सूर्यचन्द्रयोर्युति विषयोल्लेखोऽपि प्राप्यते। यत् अमावास्यान्तिमे काले सूर्यचन्द्रयो राश्यादीनामेकत्वं भवत्येव।

"तिस्रस्त्रिलोक प्रथितेन सार्धमजेन मार्गे वसतीरुषित्वा ।
तस्मादपावर्तत कुण्डिनेशः पर्वात्यये सोम इवोष्णरश्मेः ।।"[11]

अत्रोल्लिखितं यद् विदर्भनरेशो भोजस्त्रिलोकविख्यातेनाऽजेन सह वर्त्मनि त्रिषु स्थानेषूषित्वा तथैव प्रत्याजगाम यथाऽमावस्यान्त्यये चन्द्रः सूर्यात्

प्रत्यागच्छति। आस्मिन् विषये ज्योतिषशास्त्रस्य सिद्धान्तः वर्तते, यदमावस्यां सूर्यचन्द्रयोः संयोगो भवति। सूर्यसिद्धान्ते चन्द्रग्रहणाधिकारे वर्णितमस्ति।

"तुल्यौराश्यादिभिः स्यातामभावश्यान्तकालिकौ ।
सूर्येन्दु पौर्णमास्यान्ते भार्धे भागादिभिस्समौ ।"[12]

एतेन यस्मिन् काले सूर्याचन्द्रमसौ सर्वांशेन समौ भवतः स कालोऽमान्तसंज्ञक इति सूचितः। एवं यदा सूर्यचन्द्रस्थानयोरन्तरं केवलं राशिषटकं भवति तदा पूर्णिमान्तकाल इति। एवमत्र महाकविः सिद्धान्तज्योतिषस्य मूलभूतसिद्धान्ताः स्पष्टतया प्रतिपादिताः।

उपरागकारणविषयमपि कविश्रेष्ठः कालिदासः जानाति। मालविकाग्निमित्रे लिखितम्–

"कदामुखं वरतनु कारणादृते तवागतं क्षणमपि कोपपात्रताम् ।
अपर्वणि ग्रहकलुषेन्दुमण्डला विभावरी कथय कथं भविष्यति ।।"

यदा इरावती राज्ञे कुप्यति तदा राजा इरावती कथयति हे सुन्दरि ! कथय किं कदापि तव मुखं कारणेन विनैवैतत्पूर्वं क्षणमपि रक्तायतेस्म, तर्हि पूर्णिमाया अभावेऽपि कथं चन्द्रोपरागयुता रजनी भवितुं शक्यते। अनेन स्पष्टीभवती यत् आचार्यस्य कालेऽपर्वणि चन्द्रग्रहणस्याभावो मन्यते स्म। सूर्यसिद्धान्ते चन्द्रग्रहणाधिकारे वर्णितमस्ति–

"भानोर्भार्धे महीच्छाया तत्तुल्येऽर्कसमेऽपि वा ।
शशांकपाते ग्रहणं कियद्भागाधिकोनके ।।"[13]

अस्मिन् सन्दर्भे आचार्यभास्करः सिद्धान्तशिरोमणौ लिखितमस्ति–

"राहु कुभामण्डलगः शशांकम् ।
शशांकगश्छादयतीनबिम्बम् ।।"

पृथिव्याश्च्छायैवं राहुनाम्ना ज्योतिषे अङ्गीकृतम् । एतादृश गाम्भीर्य–पूर्णगणितीयज्योतिषशास्त्रज्ञानप्रदर्शनं कालिदासस्य ज्योतिषशास्त्राध्ययनस्य प्रावीण्यतां प्रदर्श्यते। गोलपरिभाषानुसारम् –

"विमण्डले भवृत्तस्य सम्पातः पात उच्यते ।
एवं चन्द्रस्य यौ पातौ तत्राद्यो राहुसंज्ञकः ।
द्वितीयः केतुसंज्ञस्तौ ग्राहकौ चन्द्रसूर्ययोः ।।"[14]

ज्योतिषशास्त्रे पञ्चताराग्रहाणाम् अर्थात् भौमबुधगुरुशुकशनिग्रहाणां गतिं द्विविधां वक्री–मार्गी च। कालिदासो ग्रहाणाम् वक्री मार्गी गतिमपि जानाति स्म । मालविकाग्निमित्रग्रन्थे वर्णितम् –

"वयस्य । दिष्ट्याऽनेनाविनये नाप्रसन्ना गतैषा । तद्वयं शीघ्रमपक्रमामः, यावदङ्गारको राशिमिवानुवक्रं प्रतिगमनं न करोति।"[15]

यदा क्रोधपूर्वकं इरावती राज्ञः सकाशात् गच्छति तदा विदूषको ब्रवीति यदेषेरावती सक्रोधाऽस्मात्स्थानाद् गता तद्वयमितः शीघ्रमेवाऽपक्रमामः, नहि तस्या वक्रीभौम इवैतस्मिन्नेव राशौ पुनरागमनं भवितुं शक्यते। अत्र इरावत्या मुखं कोपेन प्रफुल्लरक्तवर्णतामभजदिति सूचयितुमंगारकशब्दस्य प्रयोगो विहितः कालिदासेन । यतो हि वक्रावस्थायां भौमस्य स्थूलता वर्द्धते, स ज्वलिताग्निशिखोपमश्च सञ्जायते। वस्तुतो ग्रहाः स्वस्वगोले स्वस्वकक्षायां क्रमगता एव गच्छन्ति, परन्तु स्थलविशेषे कदाचित् भूवासिनां वक्रगतिका इव प्रतिभान्तीति । वक्रगतिविषये सूर्यसिद्धान्ते लिखितमस्ति –

"वक्रातिवक्रा विकला मन्दा मन्दतरा समा ।
तथा शीघ्रातिशीघ्रा ग्रहाणामष्टधा गतिः ।।"[16]

ग्रहकक्षास्थितिवशेन वक्रत्वं प्रतिभाति। यदा ग्रहः भूव आसन्नवर्ती भवति तदा भूवासिनस्तं वक्रमिव पश्यन्ति अन्यथा मार्गीगतिमिव । आचार्य कल्याणवर्मामतानुसारम् –

"वक्रिणस्तु माहवीर्याः शुभाराज्यप्रदा ग्रहाः।
पापा व्यसनिनां पुंसां कुर्वन्ति च वृथाटनम् ।।"[17]

अत्रोल्लेखनीयम् भौमः पापग्रहरूपेण वर्णितः। एवमत्र कालिदासेन भौमस्य वक्रगत्या पुनः पूर्वराश्यागमनं सप्रयोजनमभिहितम्। कालिदासेन सूर्यायनपरिवर्तनस्योल्लेखो रघुवंशे कृतम् –

"प्रययावातिथेयेषु वसन् ऋषिकुलेषु सः।
दक्षिणां दिशमृक्षेषु वार्षिकेष्विव भास्करः ।।"[18]

कुमारसम्भवेऽपि वर्णितम् –

"कुबेरगुप्तां दिशमुष्णरश्मौ गन्तुं प्रवृत्ते समयं विलङ्घ्य।
दिग्दक्षिणागन्धवहं मुखेन व्यलीक निःश्वासमिवोत्ससर्ज।।"[19]

ज्योतिषशास्त्रे वैदिककालादेव सूर्यायनपरिवर्तनस्य पर्याप्तोल्लेखः प्राप्यते। सूर्यसिद्धान्ते मानाध्यायानुसारम् –

"भानोर्मकरसंक्रान्तेः षण्मासा उत्तरायणम् ।
कर्कादेस्तु तथैव स्यात् षण्मासा दक्षिणायनम् ।।"[20]

अनेन स्पष्टी भवति यत्कालिदासः सूर्यस्योत्तरायणदक्षिणायनयो कालं जानाति स्म। रघुवंशमहाकाव्ये द्वादशसर्गानुसारं राम आतिथ्यसत्कारयुक्तेषु ऋषिकुलेषूषित्वा दक्षिणां दिशं प्रतस्थे यथा सूर्यो वर्षर्तुनक्षत्रेष्वार्द्रादिषु वसन् दक्षिणायने प्रयाति । ज्योतिषे अयनविषयं खगोलीयदृष्ट्या अतिमहत्त्वपूर्णमस्ति। एवमेव महाकविकालिदासेन स्वकीयसाहित्ये सिद्धान्तज्योतिषशास्त्रस्य गणित दृष्ट्या खगोलदृष्ट्या च गूढ़तमविविधविषयाणां विचाराः संग्रहीताः।

ब. संहिताज्योतिषम्

सूर्यपरिवेषकथनम् :– रघुवंशे सूर्यपरिवेषस्योल्लेखः दृश्यते । रघुवंशे अष्टमसर्गे लिखितम् –

"ऋषिर्देवगणस्वधाभुजां श्रुतयागप्रसवैः स पार्थिवः।
अनृणत्वमुपेयिवान् बभौ परिधेर्मुक्त–इवोष्णदीधितिः।।"[21]

राज्ञोऽजस्य वर्णने कविनोक्तं यद् यथा सूर्यः परिवेषमुक्तो भूत्वा नितरां सुशोभितो भवति तथैव महाराजोऽजो वेदाध्ययनयज्ञ– पुत्रोत्पादनैऋषिदेव–पितृणामृणेभ्यो मुक्तः सन् प्रक्रामं शुशुभे। अत्र महाकविकालिदासेन स्पष्टीकृतं यद् यथा परिवेषमुक्तः सूर्यो विश्वजनीनहितायोपकल्पते तथैव सराजापि प्रजानां मध्ये परमकल्याणकारी बभूव। परिवेषयुक्तो सूर्यचन्दौ राष्ट्रे पीडां प्रपच्छत इति अद्भुतसागरे बल्लालसेनेन वर्णितम्। पुनः रघुवंशे रामस्यविवाहे क्रुद्धस्य परशुरामस्यागमनं सर्वेषां राज्ञां कृते बन्धनकारि भवितुमर्हति। तत्रैव एकादशसर्गे उल्लिखितम्।

"लक्ष्यते स्म तदनन्तरं रविर्बद्धभीमपरिवेषमण्डलः।
वैनतेयशमितस्य भोगिनो भोगवेष्टित इव च्युतो मणिः।।"[22]

आचार्य वराहेण कथितं यद् यदा सूर्यचन्द्रयोः सम्मूर्च्छिताः किरणा वायुनामण्डलीकृत्याऽनेकवर्णाकृतयोऽभ्रे प्रतिबिम्बिता भवन्ति तदैव ते सूर्यचन्द्रौ परितः परिवेषरूपौ दृश्येते।

"सम्मूर्च्छिता रवीन्दोः किरणाः पवनेन मण्डलीभूताः।
नानावर्णा कृतयस्तन्वभ्रे व्योम्नि परिवेषाः।।"[23]

मेघविचार :– महाकवि कालिदासेन मेघविषये मेघदूतकाव्ये लिखितम्।

"जातं वंशे भुवनविदिते पुष्करावर्तकानाम्।"[24]

आचार्यवराहमिहिरकृत बृहतसंहिताग्रन्थे मेघानां वर्णनं विविधदृष्ट्या दृश्यते। धूमज्योतिः सलिलिमरुतां संघातजन्यो मेघ इति प्राचीनाचार्यानां मतम्। तत्र मेघानां चतुर्विध, नवविधमेघाश्च उपलभ्यन्ते। पराशरमते –

"आवर्तश्चैव संवर्तः पुष्करो द्रोण एव च।
चत्वारो जलदाः प्रोक्ता आवर्तादियथाक्रमम्।।"

कालिदासवर्णितमेघसंज्ञाः आवर्तपुष्करनाम्ना च। संवत्सरफल ग्रन्थानुसारम् आवर्ते छिन्नवृष्टिः। पुष्करे मन्दवृष्टिः स्यात्। एवमेव सिध्यति महाकवि कालिदासः संहिताज्योतिषशास्त्रस्य पण्डितः आसीत् इति। एतदतिरिक्तं रोहिणीचन्द्रयोगस्य वर्णनम् अभिज्ञानशाकुन्तले सप्तमांके एवं विक्रमोर्वशीये तृतीयांके कालिदासेन उल्लिखितम्। विक्रमोर्वशीये तृतीयांके दक्षिणबाहुस्पन्दनान्तरमेव पुरूरवसः प्रियोर्वशी समायाति। अत्र कालिदासो मन्यते यद् दक्षिणोबाहुर्यदि स्पन्दते तर्हि प्रियाया लाभो भवति। मेघदूतनेत्रोर्ध्वभागस्य स्फुरणसन्दर्भोल्लिखितः। अनेन कालिदासेन शकुन शास्त्रेऽपि विशिष्य ज्ञातमिति ज्ञायते।

स. होराज्योतिषम्

"ग्रहैस्ततः पञ्चभिरुच्चसंश्रयैरसूर्यगैः सूचितभाग्यसम्पदम्।
असूत पुत्रं समये शचीसमा त्रिसाधना शक्तिरिवार्थमक्षयम्।।"[25]

श्लोकेऽस्मिन् महाकविकालिदासेन जातकशास्त्रोक्तराज्ययोगस्य चर्चा कृताः। जन्मकुण्डल्यां ग्रहाणां केचिद् योगाः फलरूपेण जातकोऽयं राजा भविष्यतीति सूचयन्ति। ज्योतिषदृष्ट्या कालिदासो दैवज्ञरूपेण प्रतिष्ठितम् आसीत् इति स्पष्टतया भासते। श्लोकानुसारं रघोर्जन्मसमये पञ्चग्रहा उच्चस्था आसन्।

"अजवृषमृगाङ्गनाकर्किमीनवणिजांशकेष्विनाद्युच्चाः।
दशशिख्यष्टाविंशतितिथिन्द्रियत्रिनवविंशेषु।।"[26]

वराहमिहिरेण लघुजातके ग्रहोच्चनीचस्थितिः वर्णिताः। यद् रघोर्जन्म समये पञ्चग्रहाः उच्चस्था आसन् ते उदयंगता रघोः साम्राज्यवैभवं सूचयन्ति स्म। "असूर्यगैः" अर्थात् उदयंगतग्रहाः। ज्योतिषसिद्धान्तानुसारं ये ये ग्रहाः सूर्येण सह विचरन्ति ते ऽस्तं गच्छन्ति। अस्तंगतानां ग्रहाणां प्रभावः पूर्णरूपेण न भवति। सूर्यसिद्धान्ते उदयास्ताधिकारे उदयास्तयोर्वैशिष्ट्यम् लिखितम्।

"अथोदयास्तमययोः परिज्ञानं प्रकीर्त्यते ।
दिवाकर कराक्रान्तमूर्तीनामल्पतेजसाम् ।।" [27]

सिद्धान्ते भौम–बुध–गुरु–शुक्र–शनि ग्रहाणाम् अस्तांशा उदितांशाश्च सम्यक् वर्णिताः । एवमेव कालिदासस्य जातकशास्त्रज्ञानवैशिष्ट्यं परिलक्ष्यते । तेन कुमारसम्भवस्यैकस्मिन् श्लोके ज्योतिषशास्त्रीय पारिभाषिकशब्दस्यापि प्रयोगं कृतवान् –

"अथौषधीनामधिपस्य वृद्धौ तिथौ च जामित्रगुणान्वितायाम् ।
समेतबन्धुर्हिमवान् सुतायाः विवाहदीक्षाविधिमन्वतिष्ठत् ।।" [28]

महाकविकालिदासो न केवलं सप्तमभावं जानाति अपितु विवाहप्रसंगे जामित्रदोषसन्दर्भमपि जानाति । ज्योतिषशास्त्रानुसारं लग्नचन्द्रनक्षत्राभ्यां चतुर्दशं नक्षत्रं जामित्रसंज्ञकम् । जामित्रदोषो द्विविधो वर्तते लग्नाच्चन्द्राच्च । आचार्यरामदैवज्ञानुसारम् –

"जामित्रं द्विविधं प्रोक्तं गर्गगालवगौतमैः ।
तस्माल्लग्नाच्च चन्द्राच्च जामित्रं परिवर्जयेत् ।।" [29]

पार्वत्या विवाहलग्नाज्जामित्रभावे गुरुचन्द्रबुधग्रहाणां योग आसीत् इति कालिदासस्य "जामित्रगुणान्वितायाम्" इति वचनेन प्रमाणी भवति ।

यात्रायां शुक्रदृष्टिर्वजनीयेति ज्योतिषसिद्धान्तस्य चर्चा महाकविकालिदासेन कुमारसम्भवे कृता ।

"दृष्टिप्रपातं परिहृत्य तस्य कामः पुरः शुक्रमिव प्रयाणे ।
प्रान्तेषु संसक्तनमेरुशाखं ध्यानास्पदं भूपतेर्विवेश ।।" [30]

अत्र महाकविनाऽभिहितं यद् यथा यात्रायां जनाः सम्मुख शुक्रस्य दृष्टिं वर्जयन्ति तथैव कामदेवोऽपि नन्दिनो दृष्टिं वर्जयित्वा नमेरुशाखाभिरावृतं शिवस्य समाधिस्थलं प्रविवेश । ज्योतिषशास्त्रस्य यात्राप्रकरणेषु सम्मुखशुक्रस्य दोषोऽभिहितो वर्तते ।

"उदेति यस्यां दिशि यत्र याति गोलभ्रमाद्वाथ ककुम्भ संघे ।
त्रिधोच्येते सम्मुख एव शुक्रो यत्रोदितस्तां तु दिशं न यायात् ।।" [31]

मुहूर्तचिंतामणौ सम्मुखशुक्रदोषस्य विषये कथितं यद् यस्यां दिशि शुक्रोदयः स्यातां यात्रां न कुर्यात् । प्रतिशुक्रस्य दोषो वधूप्रवेशे द्विरागमने चापि कीर्तितो ज्योतिर्विदभिः ।

एवमेव प्रकारेण दृश्यते यत् समग्रे कालिदासकृतसाहित्ये ज्योतिषविषयसामग्री यथा विविधकालविभाजन– युगादि–व्यवस्था–ग्रहस्थिति–गतिभेद–पञ्चाङ्ग–तिथि–वार–नक्षत्र योगादि सैद्धान्तिकविषयाणां वर्णनं वर्तते । एतदतिरिक्तं संहिताज्योतिष–होराज्योतिषसम्बद्धपरम्परागत–सूक्ष्मातिसूक्ष्म–विषयादारभ्य लोकव्यवहारोपयोगी ज्योतिषविषयपर्यन्तं यात्रामुहूर्त– सदृशविषयवस्तु अपि नाटकेषु महाकाव्येषु दरीदृश्यन्ते । पाण्डित्यपूर्णविषय– प्रतिपादनं त्रिस्कन्धज्ञज्योतिर्विज्ञान–ज्ञानं विनैव न भवितुमर्हति ।

– सन्दर्भसूची –

1. सिद्धान्तशिरोमणिः मध्यमाधिकारःश्लोक सं. 9
2. तत्रैव मध्यमाधिकारः वासनाभाष्यटीका – नृसिंह दैवज्ञः
3. कालिदास ग्रंथावली भाग – 1, पृ. 4, श्लोक 1/46
4. सूर्यसिद्धान्त, मान्नाध्यायः, श्लो. 15, 16
5. कालिदास ग्रंथावली I, पृ. 386, कुमारसम्भवः 7/6
6. तत्रैव. I, पृ. 166, रघुवंश 11/36
7. अभिज्ञानशाकुन्तलम् तृतीयांके
8. कालिदास ग्रंथा. I, पृ. 35, रघुवंश 3/22
9. तत्रैव I, पृ. 386, कुमारस. 7/8
10. बृहत्संहिता 4/2–3
11. कालिदासग्रंथा I, पृ. 99 रघुवंश 7/33
12. सूर्यसिद्धान्त अ. 4 श्लो. 7
13. तत्रैव अ. 4 श्लो. 6
14. गोलपरिभाषा (सीतारामझा कृत) पृ. 17, श्लोक 55–56

15. तत्रैव तृतीये अंके पृ. 244
16. सूर्यसिद्धान्ते द्वितीयीअध्यायेश्लोक. 12 (स्पष्टाधिकारः)
17. सारावली अध्याय – 5, श्लोक. 39
18. कालिदास ग्रंथा. I, रघु. 12/25 पृ. 182
19. तत्रैव I, कुमार. 3/25 पृ. 333
20. सूर्यसिद्धान्त–मानाध्याय (14) श्लोक 9
21. कालिदास ग्रंथा. I, रघु. 8/30 पृ. 112
22. तत्रैव I, रघु. 11/54 पृ. 170
23. बृहत्संहिता अ. 34, श्लो. 1
24. कालिदास ग्रंथा. I, मेघ.श्लो. 6 पृ. 429
25. तत्रैव I, रघु. 3/13 पृ. 33
26. लघुजातकम् अ. 1, श्लोक 21
27. सूर्यासिद्धान्त उदयास्ताधिकार 9, श्लो. 11
28. कालिदास ग्रंथा. I, कुमार 7/1 पृ. 385
29. मुहूर्तचिन्तामणिः विवाहप्रकरण पीयूषधाराटीका
30. कालिदास ग्रंथा. I, कुमार 3/43 पृ. 336
31. मुहूर्तचिंतामणि यात्रा प्रकरण, श्लोक 37

---------- ❦ ----------

कालिदाससाहित्ये शिक्षाव्यवस्था

डॉ. हृषीकेश दलाई

---------- ❦ ----------

प्रस्तावना :

'शिक्षा' इति शब्दः शिक्ष् विद्योपादाने इति धातोः निष्पन्नो जायते। यस्या अर्थः भवति शिक्षणम् अध्ययनं वा। वस्तुतः प्राचीनकाले शिक्षा इति स्थाने विद्या इति शब्दस्य प्रयोगः आसीत्। अथ **सा विद्या या विमुक्तये** इति खलु उपनिषद् वाक्यम्। मुण्डकोपनिषदि **विद्या** द्विधा इति उक्ता – परा विद्या अपरा विद्या चेति। तत्र अपरा विद्या इत्युक्ते ऋग्वेदो, यजुर्वेदो, सामवेदोऽथर्ववेदः इति चर्तुवेदाः, शिक्षा, कल्पो, व्याकरणं, निरुक्तं, छन्दो ज्यौतिषमिति षड्वेदाङ्गानामध्ययनमासीत्। परा इत्युक्ते यया तदक्षरमधिगम्यते इति।

विद्या तु वैदुष्यमुपार्जयति जगति लोकद्वयसाधनाय इति भौतिकाभौतिकजगति सिद्धिकारण भूतेयं शिक्षा नाम जीवने शुभाशुभबोधिनी, पुण्यापुण्यविश्लेषिणी, हिताहितनिदर्शिनी, कृत्याकृत्यनिदर्शिनी, समुन्नतिसाधिकाऽवनतिनाशिनी, सद्भावविभावयित्री, दुर्भावतिरोधात्री आत्मसंस्कृतिहेतुर्मनसः प्रसादयित्री पौरुषस्य पावनीति अभिधीयते व्यपदिश्यते च। विद्यायाः प्रसंङ्गे नीतिशतके कविना भर्तृहरिणा उक्तं यत् –

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्
विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः।

विद्या बन्धुजनो विदेशगमने विद्यापरं दैवतं
विद्या राजसु पूजिता न तु धनं विद्या विहीनः पशुः।।
(नीति. वि. प्र. 16)

विद्यायाः विषये गीतायां श्रीकृष्णेन उक्तं यत्।

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।

भवतु नाम शिक्षा विद्या वा ज्ञानम् अखिलसंसारे एतद्विना नास्ति गत्यन्तरम्। शिक्षया, विद्यया, ज्ञानेन वा यः प्रकाशः ज्ञानं नेतृत्वञ्च प्राप्यतेऽस्माभिः तेन अस्माकं पूर्णरूपान्तरणं जायते।

कालिदाससाहित्ये शिक्षायाः स्वरूपम् –

प्राचीनकाले भारते विद्यायाः महत्त्वपूर्णं स्थानमासीत्। विद्याध्ययनस्य व्यवस्था गुरुकुले आसीत्। तत्रोपनयनसंस्कारस्य, ब्रह्मचर्याश्रमस्य च महत्त्वमासीत्। उपनयनसंस्कारान्तरं ब्रह्मचारी विद्याध्यनार्थं गुरुकुले प्रविशति स्म। तदा भारते वर्णानुसारं ब्राह्मण–क्षत्रिय–वैश्य–शूद्राणां कृते उपनयनार्थं भिन्नो–भिन्नः समयः आसीत्। अतः मनुना मनुस्मृतौ उक्तं यत्।

गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम्।
गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः।। (मनु. 2.36)

अर्थात् गर्भस्याष्टमवर्षे ब्राह्मणानाम्, एकादशवर्षे क्षत्रियाणां, द्वादशवर्षे वैश्यानाञ्च उपनयनसंस्कारः करणीयः इति।

कालिदासकालेऽपि विद्या अध्ययनस्य प्रारम्भः उपनयसंस्कारानन्तरं जायते स्म। इक्ष्वाकुवंशस्य राजकुमाराः दिलीपः, रघुः, अज इत्यादयः कुलगुरुवशिष्ठस्य गुहे निवासं कृत्वा विद्याध्ययनं कुर्वन्ति स्म इति रघुवंशमहाकव्ये कालिदासेन उल्लिखितम् । तत्र शिष्येभ्यः आन्वीक्षिकी, तयी, वार्ता, दण्डनीति इत्यादयो विद्याः दीयन्ते स्म। आन्वक्षिकी इत्युक्ते – तर्कशास्त्रं, दर्शनशास्त्रं, आध्यात्मविद्या च। त्रयी इत्युक्ते ऋक्– यजु– सामवेदाः, शिक्षा, कल्पः, व्याकरणं, निरुक्तं, छन्दः, ज्यौतिषञ्चेति षड्वेदाङ्गानि, आयुर्वेदः धनुर्वेदः इति उपवेदानाम् अध्ययनमासीत्। वार्ता इत्युक्ते – कृषिः, पशुपालनं, वाणिज्यञ्च इति। दण्डनीतिः इत्यत्र राजनीतिशास्त्रं, राज्यशासनञ्च इति।

अतः रघुवंशे उक्तं यत्– धियः समग्रैः स गुणैरुदारधीः क्रमाच्चतस्रश्चतुर्णवोपमाः।

ततार विद्याः पवनातिपतिभिर्दिशो हरिद्भिर्हरितामिवेश्वरः।। (रघु 3.30)

एतद् व्यतिरिक्तयुद्धविद्या, नृत्यशास्त्रं, ललितकला, चित्रकला, संगीतविद्या इत्यादीनां चतुषष्ठिकलानामध्ययनस्य व्यवस्था आसीत् इति कालिदासस्य महाकाव्येषु नाटकेषु च दृश्यते। यथा **ललिताभिनयस्य शिक्षा** (माल. 4.9) अनेन ज्ञायते तदा अभिनयशिक्षा प्रचलनमासीत्।

कालिदाससाहित्ये विद्याध्ययनस्य कालः

भारतीयसंस्कृतौ चतस्रः आश्रमव्यवस्था वर्तते। यथा – ब्रह्मचर्याश्रमः, गृहस्थाश्रमः, वानप्रस्थाश्रमः, सन्यासाश्रमश्चेति। ब्रह्मचर्याश्रमे शिष्यः गुरुकुले विद्या अध्ययनं करोति स्म। गृहस्थाश्रमे संसारस्य नियमान् परिपाल्य ऋणमुक्तिः भवति स्म। वानप्रस्थाश्रमे भौतिकभोगविलासं त्यक्त्वा अरण्ये निवासं करोति स्म। सन्यासाश्रमे स्वशरीरं त्यक्त्वा समाधिं प्राप्नोति स्म। भारतीय संस्कृतौ ब्रह्मचर्याश्रमस्य महत्त्वपूर्णं स्थानं वर्तते। अयं समयः विद्या अध्ययनस्य कृते उपयुक्तसमय इति। महाकविकालिदासः रघुवंशमहाकाव्ये विद्याध्ययनस्य समयप्रसङ्गे एवं वदति यत् –

शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्
वार्द्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्। (रघु 1.5)

अर्थात्– शैशवावस्थायां मनुष्येन विद्याध्ययनं करणीयम्।
यैवनावस्थायां गृहस्थाश्रामे प्रवेशः करणीयः इति।

पुनश्च कालो ह्ययं संक्रमितुं द्वितीयं सर्वोपकारक्षममाश्रमं ते। (रघु 5.10)

उपात्तविद्यस्य कौत्सस्य वर्णनप्रसङ्गे ज्ञायते यत् प्रथमकालः ब्रह्मचर्याश्रमः तदनन्तरमेव गृहस्थाश्रमः वर्तते। कालिदासेन अजस्य गृहस्थाश्रमप्रवेशप्रसङ्गे उक्तं यत्।

उपात्तविद्यं विधिवद्गुरुभ्यस्तं यौवनोदेभ्दविशेषकान्तम् । (रघु 5.37)

अतः एवं ज्ञायते यत् – विद्याध्ययनस्य कालः ब्रह्मचर्याश्रमः इति ।

कालिदासः विद्याध्ययनस्य कृते शैशवावस्था एका उपयुक्तावस्था इति अङ्गीकरोति स्म । अतः इक्ष्वाकुवंशस्य राजकुमाराः शैशवावस्थायां, युद्धविद्या, तर्कशास्त्रं, नीतिशास्त्रादीनाम् अध्ययनं कुर्वन्ति स्म । न केवलं कालिदासः मनौवैज्ञानिका अपि इमाम् अवस्थां महत्त्वपूर्णम् अवस्थाम् इति अंङ्गीकुर्वन्ति । कारणमस्यामवस्थायां बालकस्य शारीरिकः मानसिकः, बौद्धिकश्च विकासः भवति । तथा च विद्या अध्ययनस्य वेगः तीव्रः भवति । अस्मिन् प्रसङ्गे पाश्चात्त्य मनोवैज्ञानिकाः वाटसन महोदयाः वदन्ति यत् –

The scope and intensity of learning during infency exceeds that of any other period of development.

कालिदाससाहित्ये शिक्षाया उद्देश्यम् –

संप्रत्याधुनिककाले शिक्षायाः मुखोद्देश्यं धनोपार्जनं जीविकानिर्वहणं च इति वर्तते । परन्तु प्राचीनकाले शिक्षायाः परमोद्देश्यमासीत् धर्म – अर्थ – काम – मोक्षादीनां पुरुषार्थचतुष्टयादि अपवर्गफलप्राप्तिश्च । महाकविकालिदासकलेऽपि शिक्षायाः मुख्योद्देश्यं मोक्षप्राप्तिः इति आसीत् । धर्म – अर्थ – काम – मोक्षः इति पुरुषार्थचतुष्टय विषये रघुवंशमहाकाव्ये, कुमारसम्भवमहाकाव्ये, अभिज्ञानशकुन्तलानाटके च महाकविकालिदासेन बहुधा प्रयोगः कृतः इति दृश्यते । रघुवंशमहाकाव्यस्य अष्टमसर्गे कालिदासेन उक्तं यत् – **अपवर्ग महोदयार्थयोर्भुवमंशाविव धर्मयोर्गतौ** (रघु 8.16) अर्थात् – मोक्षप्राप्तिः निमित्तं राजा रघुः पुत्र अजस्य हस्ते राज्यशासनं दत्त्वा सन्यासाश्रमे प्रवेशं करोति स्म । चरित्रनिर्माणं, व्यक्तित्वविकासः, भारतीयसंस्कृतेः संरक्षणं च शिक्षायाः अपरमुद्देश्यमासीत् इति । विद्यार्थ्यीनां सर्वाङ्गीणविकासप्रसङ्गे अभिज्ञानशकुन्तलायां महर्षिकण्व एवम् वदति यत्– **सुशिष्यपरिदत्तेव विद्या अशोचनीयासि मे संवृत्ता ।**

कालिदाससाहित्ये शिक्षायाः केन्द्रम् –

आधुनिककाले विद्यालयः महाविद्यालयः, विश्वविद्यालयः, तथा अन्या शिक्षासंस्थाश्च विद्याध्यनस्य प्रमुखं केन्द्रं वर्तते । परन्तु वैदिककाले गुरुकुलः आश्रमः, मठः, विहारश्च विद्याध्ययनस्य प्रमुखकेन्द्रमासीत् । गुरुकुलस्य आश्रमस्य वा प्रमुखः कुलपतिः आसीत् । गुरुकुलस्य संपूर्णं उत्तरदायित्वं कुलपतेः उपरि आसीत् । कुलपतिः कः इति प्रश्ने –

मुनीनां दशसाहस्रं योऽन्नपानादिपोषणात् ।
अध्यापयति विप्रर्षिरसौ कुलपतिः स्मृतः ।।

यः दशसहस्रमुनीनां भरण–पोषणं, अध्ययनं, उत्तरदायित्वं च आवहति स वै कुलपतिः । कालिदासकालेऽपि गुरुकुलः आश्रमश्च विद्याध्ययनस्य प्रमुखकेन्द्रमासीत् । तत्र रघुवंशमहाकाव्ये कुलगुरुवशिष्ठस्याश्रमः, विश्वामित्रस्याश्रमः वरतन्तोः आश्रमश्च शिक्षायाः प्रमुखं केन्द्रमासीत् । यत्र इश्वाकुवंशस्य राजकुमाराः दिलीपः रघुः, अजः, दशरथः, रामः, लक्ष्मणः भरतः, शर्तुघ्न, कौत्सश्च विद्या अध्ययनं कृतवन्तः । अभिज्ञानशाकुन्तलायां महर्षिकण्वस्य आश्रमं सुप्रसिद्धं शिक्षाकेन्द्रमासीत् यत्र शाकुन्तला, प्रियवंदा, अनसूया, शाङ्र्गरवः इत्यादयः शिक्षा प्राप्नोवन्ति स्म । कालिदासस्य विक्रमोर्वशीयनाटके कुलगुरु च्यवनस्य आश्रमविषये वर्णनं दृश्यते यत्र उर्वशी स्वस्य पुत्रम् आर्य महर्षि च्यवनस्याश्रमे पालनार्थं आर्यांसत्यवतीं दत्तवती इति । आचार्य च्यवनः जातकर्मादिसंस्कारं कृत्वा विद्यामध्यापितवान् । कालिदासेन महर्षिवशिष्ठस्य आश्रमस्य मनोहरप्रसंगे एवमुक्तम् –

निर्दिष्टां कुलपतिना स पर्णशालामध्यस्य प्रयतपरिग्रहद्वितीयः ।
तच्छिष्याध्ययननिवेदिता वसानां संविष्टं कुशशयने निशां निनाय ।।

कालिदाससाहित्ये अध्यापकस्य स्थानं –

प्राचीनभारतीयशिक्षाव्यवस्थायाम् अध्यापकस्य स्थानं सर्वोच्चतममासीत् । तदा अध्यापकस्य कृते शिक्षकः, अध्यापकश्च इति सामान्यशब्दानां प्रयोगः नासीत् ।

तत्र शिक्षकस्य, अध्यापकस्य स्थाने गुरुः आचार्यश्च इति सम्बोधनमासीत् । तदा आचार्यस्य स्थानं सर्वोत्तम् आसीत् । अतः मनुस्मृतौ उक्तं –

आचार्यो ब्रह्मणो मूर्तिः पिता मूर्तिः प्रजायते । (मनु 2.225)

अर्थात् –आचार्यः साक्षात् ब्रह्मस्वरूपं, पिता ब्रह्मदेवसदृश एव ।

पुनश्च–तैत्तेरीयोपनिषदि उक्तं –

आचार्यः पूर्वरुपं । अन्तेवास्युत्तररुपं । विद्या संधिः, प्रवचनं संधानम् इत्यधिविद्यम् ।

तदा विद्या अध्ययनं श्रवणं–चिन्तनं – मननं – निदिध्यासनं इत्येतदाधारितासीत् । प्राध्यापकः विना तत्रविज्ञानं प्रयोगं कृत्वा सम्यक् अध्यापनं करोति स्म । परन्तु आधुनिककाले प्राध्यापकाः विविधानां तन्त्रज्ञानानां प्रयोगं कृत्वा अध्यापयन्ति । साफल्यं प्राप्नोन्ति न वा इति संशयः । परन्तु प्राचीनकाले प्राध्यापकाः तन्त्रज्ञानं विना अध्यापनं कृत्वा साफल्यं प्राप्नुवन्ति स्म । अस्मिन् प्रसंगे महाकविकालिदासेन मालविकाग्निमित्रनाटके एवमुक्तं यत् –

शिलष्टा क्रिया कस्यचिदात्मसंस्था संङ्कान्तिरन्यस्य विशेषयुक्ता ।
यस्योभयं साधु स शिक्षकाणां धुरि प्रतिष्ठापयितव्य एव ।। (माल. 1.16)

अर्थात् – कश्चन शिक्षकः सम्यक् अध्ययनं करोति । कश्चन शिक्षकः सम्यक् अध्यापनं करोति । कश्चन शिक्षकः सम्यक् अध्ययनमध्यापनञ्च करोति ।

यः शिक्षक अध्ययनमध्यापनञ्च उभयमपि कार्यं सम्यक्तया संपादनं करोति स एव प्रकृतः शिक्षकः इति ।

पुनश्च शिक्षकविषये मालविकाग्निमित्रनाटके कालिदासेन उक्तम्–

उपदेशं विदुः युद्धं सन्तस्तमुपदेशिनः ।
श्यामायते न युष्मासु यः कञ्चनमिवाग्निषु ।। (माल 2.9)

कालिदास–साहित्ये अध्यापनविधिः

स एव सफलः अध्यापकः वर्तते, यो विविधानामाध्यापनविधीनां प्रयोगं कृत्वा स्वस्य अध्यापनकार्यं सफलतया समापयति । तथा शिक्षणस्य उद्देश्यं पूर्णं भवति इति । आधुनिककाले अध्यापकः अध्यापनकार्ये प्रश्नोत्तरविधिः व्याख्यानविधिः, प्रत्यक्षविधिः, योजनाविधिः, आगमनविधिः, निगमनविधिश्च विविधानां विधीनां प्रयोगं कृत्वा अध्यापयति । प्राचीनकालेऽपि आचार्याः सूत्रविधिः, वादविवादविधिः, प्रश्नोत्तरविधिः, व्यख्यानविधिनां प्रयोगं कृत्वा वेदः, उपनिषदः, वेदाङ्गानि, दर्शनं, व्याकरणञ्च विविधानां पारम्पारिकविषयाणाम् अध्ययनं कुर्वन्ति स्म । कालिदाससाहित्येऽपि वेदः, उपनिषद् दर्शनं, तकशास्त्रं, ललितकला, चित्रकला इत्यादीनां विद्यानाम् अध्यापनं प्राचीनविधीनां प्रयोगं कृत्वा अध्यापयति स्म इति रघुवंशमहाकाव्ये, शाकुन्तलनाटकेषु दृश्यते ।

कालिदाससाहित्ये गुरुशिष्ययोः सम्बन्धः

प्राचीनभारतीयशिक्षाव्यवस्थायां गुरु–शिष्ययोः सम्बन्धः महत्त्वपूर्णं आसीत् । परन्तु संप्रति शिक्षाव्यवस्थायां गुरु–शिष्ययोः तादृशः सम्बन्धः न दृश्यते यथा प्राचीनशिक्षाव्यवस्थायामासीत् । तदा शिष्यस्य गुरुं प्रति भक्तिः, गुरोः शिष्यं प्रति स्नेह आशीर्वादश्च आसीत् । कालिदासकालेऽपि गुरुशिष्ययोः सम्बन्धः मधुर आसीत् इति ज्ञायते । यथा रघुवंशे द्वितीयसर्गे **गुरुर्भवान्दर्शितशिष्यभक्तिः** (रघु. 2.40) इति दृश्यते । तथा च रघुवंशे कुलगुरुवशिष्ठस्य इश्वाकुवंशस्य राजकुमारैः सह, शकुन्तलानाटके महर्षिकण्वस्य शकुन्तलया सह गुरुशिष्ययो, सम्बन्धः दृश्यते एवञ्च रघुवंशस्य पंचमसर्गे कौत्सस्य गुरुभक्तिः दृश्यते । यः चर्तुदशविद्या अध्ययान्तरं गुरुदक्षिणारूपेण चतुष्कोटिसुवर्णमुद्रानिमित्तं राजा रघोः गृहं गत्वा याचनां कृतवान् । यथा –

समाप्यविद्येन मया महर्षिर्विज्ञापितोऽभूद् गुरुदक्षिणायै ।
स मे चिरायास्स्वलितोपचारां तां भक्तिमेवागणयत्पुरस्तात् ।।
(रघु. 5.20)

कालिदाससाहित्ये अनुशासनम् –

अनुशास्यते इति अनुशासनम्। अनुशासनं भूषणं भवति जीवनस्य न हि अनुशासनमन्तरा जीवनं सुशोभते। बालकस्य व्यक्तित्वविकासे अनुशासनस्य महत्त्वपूर्णं योगदानं वर्तते। प्राचीनभारतीयशिक्षाव्यवस्थायां अनुशासनस्य प्रमुखस्थानमासीत्। गुरुकुले, आश्रमे च ये विद्यार्थिनो विद्याध्ययनं कुर्वन्ति स्म, तेषां कृते अनुशासनव्यवस्था आसीत्। आश्रमे निवासार्थं, विद्याध्ययनार्थं दिनचर्या निमित्तं च आचार्येण केचित् नियमाः निर्धारिताः तेषां नियमानां परिपालनं विद्यार्थिनः कुर्वन्ति स्म। ये शिष्याः अनुशासनस्य परिपालनं न कुर्वन्ति स्म तेषां कुते दण्डव्यवस्था आसीत्। अनेन छात्राणां व्यक्तित्वविकासः जायते। कालिदाससाहित्येऽपि गुरुकुले आश्रमे च छात्राणां कृते अनुशासनमासीत् इति, रघुवंशे वशिष्ठस्याश्रमः, शाकुन्तलानाटके महर्षि कण्वाश्रमः तस्योदाहरणं वर्तते। यथा– स्थिता तिष्ठेत्युच्चैर्वदति गुरुशिष्ये गुरुसमे'' (शाकु 6.9)

अतः एव ज्ञायते यत् कालिदाससाहित्येऽपि अनुशासनं प्रमुखमासीत्।

अनुशासनप्रसंगे मनुना उक्तं यत् –

सर्वो दण्डजितो लोको दुर्लभो हि शुचिर्नरः।
दण्डस्य हि भयात्सर्वं जगद् भोगाय कल्पते। (मनु. 7)

कालिदाससाहित्ये सहशिक्षणम्

आधुनिकशिक्षाव्यवस्थायां सहशिक्षणम् एकं महत्त्वं स्थानमवहति। परन्तु सहशिक्षणं न तु आधुनिकसंकल्पना इति। कालिदाससाहित्येऽपि सहशिक्षण व्यवस्था दृश्यते। महाकविकालिदासस्य अलिज्ञानशकुन्तलानाटके सहशिक्षा व्यवस्था दृश्यते। महर्षिकण्वस्य आश्रमे शाकुन्तला, प्रियंवदा, अनुसया इत्यादिभिः ऋषिकन्याभिः सह हरीतः शाङ्गरवः शारद्वद इति महर्षिकण्वस्य शिष्याः अध्ययनं कुर्वन्ति स्म। अतः कालिदासकालेऽपि सहशिक्षाव्यवस्था आसीत्।

कालिदाससाहित्ये स्त्रीशिक्षा –

वैदिककालादेव स्त्रीशिक्षायाः प्रथाप्रचलनमासीत्। गार्गी, देवयानी, आत्रेयी, मैत्रेयी, घोषा, उर्वशी, उषा, लोपामुद्रा इत्यदयः स्त्रीय वेदादी शास्त्राणां अध्ययनं कृतवत्यः। सुशिक्षितैव स्त्री सद्गृहिणी, सती, साध्वी, सत्कर्मपरायणा, वंशप्रतिष्ठा स्वरुपा च भवितुमर्हति, सैव सद्वृत्तादिसद्गुण गणान्विता सन्ततिविद्यातमिष्टो। अतः मनुना उक्तं।

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः। (मनु. 3.56)

आधुनिककालेऽपि स्त्रीशिक्षायाः महत्वपूर्णं स्थानं वर्तते। स्त्रियश्च उच्चशिक्षाविभूषिता वर्तन्ते। कालिदाससाहित्येऽपि स्त्रीशिक्षायाः महत्त्वपूर्णं स्थानं दृश्यते कालिदासस्य अभिज्ञानशाकुन्तलानाटके स्त्रीशिक्षायाः प्राधान्यं दृश्यते। तत्र गौतमी, शाकुन्तला, अनुसया, प्रियवंदा च ऋषिकन्यानां शिक्षा महर्षिकण्वस्याश्रमे संपादनं कुर्वन्ति स्म।

मालविकाग्निमित्रनाटके मालविका आचार्यहरदत्तद्वारा नृत्यविद्या अध्ययनं करोति इति दृश्यते।

शकुन्तला पत्र–लेखनम्, चित्रकला च इति विषयद्वये प्रावीण्यं प्राप्तवती इति शाकुन्तलानाटके दृश्यते। तथा च–

शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भुर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः।
भूयिष्ठं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः।। (अ.शा. 4.20)

पद्येऽस्मिन् कण्वः शकुन्तलामुपदिशति – तत्र पतिगृहं प्राप्य श्वसुरदि–गुरुजाननां सदा सेवां कुरु। सपत्नीनां प्रति सदा सौख्यं धारय। यदि ते पतिः कदाचित् तव तिरस्कारं करोति तथापि त्वं क्रोधवशात् तस्य प्रतिकुलगामिनी मा भव। सेवकवर्गं प्रति त्वं उदारचरिता भव। ऐश्वर्ये प्राप्ते सति गर्वं मा कुरु

इत्थमाचरणे विवाहिताः नार्यः गृहलक्ष्मीपदं प्राप्नुवन्ति तद्विपरीताचरणयुक्तयः स्वस्य कुलस्य विनाशाय कारणीभूताः भवन्ति। प्रसंगेऽस्मिन् नारीणां कृते विशिष्टा कापि शिक्षा कालिदासेनाभिहिता। यस्याः शिक्षायाः आवश्यकता सम्प्रति समाजे सर्वासां नारीणां कृते आवश्यकम् अस्त्येव।

उपसंहार :

संस्कृतवाङ्मये कालिदासदृशः नास्त्यपरमहाकविः। तस्य साहित्यमपि सुविशालं भवति। कालिदासस्य प्रशंसाप्रसंगे गोवर्धनाचर्येण एवमुक्तम्–

साकूतमधुरकोमलविलसिनीकलकण्ठकूजितप्राये।
शिक्षासमयेऽपि मुदे रतिलीला कालिदासोक्तिः।

महाकविकालिदासस्य काव्यस्य रचनाशैली विश्वे प्रसिद्धा वर्तते। तेषां महाकाव्ये, खण्डकाव्ये, नाटकेषु च रस – अलंकार–उपमादीनां प्रयोगः सर्वत्र दृश्यते। अतः **उपमा कालिदासस्य** इति वाक्यं जगत्प्रसिद्धमिति। कालिदासेन काव्येषु नाटकेषु च विद्यायाः कृते महत्त्वपूर्णं स्थानं दत्तं वर्तते। गुरुकुलपरम्पराः तत्र अलौकिकमुदाहरणम्। तत्र अपवर्गचतुष्टयं, भारतीयसंस्कृतेः संरक्षणमेव शिक्षायाः प्रमुखमुद्देश्यमासीत्। अतः कालिदाससाहित्ये वर्णितायाः शिक्षायाः प्रासङ्गिकत्वम् अद्यापि अस्ति इति नातिशयोक्तिः।

अनुशीलितग्रन्थाः

1. कालिदास ग्रन्थावली	डॉ. ब्रह्मनन्द त्रिपाठी	चौखम्बा सुरभारती प्रकाशन, वाराणसी
2. अभिज्ञानशाकुन्तलम्	डॉ. वेदप्रकाश शास्त्री	चौखम्बा विद्याभवन, वाराणसी
3. रघुवंशम्	डॉ. श्रीकृष्णमणी त्रिपाठी	चौखम्बा सुरभारती प्रकाशन, वाराणसी
4. मनुस्मृतिः	पंडित रामेश्वरभट्ट	चौखम्बा संस्कृत प्रकाशन, दिल्ली
5. महाकविकालिदास	डॉ. प्रभुदयाल अग्निहोत्री	ईस्टन बुक लिंकर्स, दिल्ली
6. कालिदास का भारत	भगवतशरण उपाध्याय	की 5/263 यमुना विहार, दिल्ली भारतीय ज्ञानपीठ, नई दिल्ली.

कालिदासस्य साहित्ये प्रसाधनम् अलङ्करणं च

डॉ. स्मिता होटे

सारांशः :– सौंदर्यासक्तिःमनुजस्य स्वाभाविकी प्रवृत्तिः। अतः स्वसौन्दर्यवर्धनार्थं प्रत्येकः मनुजः प्रवर्तते। स्वाभाविकं रूपं प्रसाधनेन अधिकाधिकम् आकर्षकं कर्तुं यथा आधुनिककाले तथैव प्राचीनकालेऽपि स्त्रीपुरूषाः आयासयन्ति स्म। अस्य प्रभूतं प्रमाणं संस्कृतसाहित्ये उपलभ्यते। वेदरामायणमहाभारतपुराणादिषु प्राचीनसंस्कृतसाहित्येषु कालिदासादिनाम् अभिजातसाहित्येषु च आयुर्वेदग्रन्थेषु च अलंकाराणां प्रसाधनानां प्रचुरोल्लेखः विद्यते तेन तत्कालेषु विद्यमानानां प्रसाधनानां, प्रचलनं रितिपरम्पराणां प्रचलनं, तेन प्राचीनभारतीयानां सांस्कृतिकवैभवम् आर्थिकसमृद्धिः अलङ्कार–निर्माणोद्योगः इत्येतेषां विषयाणां ज्ञानम् इति अस्य शोधनिबंधस्य उद्दिष्टम्। स्थालीपुलाकन्यायेन कालिदासस्य साहित्ये उपलब्धानां प्रसाधनानाम् अलंकरणानाम् आलेखः अत्र अस्मिन् शोधनिबन्धे प्रस्तूयते।

सौंदर्यं कस्य न मनो हरति? युक्तमुक्तं महाकविना भासेन "सर्वजनमनोभिरामं सौभाग्यं नाम।"[1] सौंदर्यासक्तिः मनुजस्य स्वाभाविकी प्रवृत्तिः।

संस्कृतसरस्वत्याः अनन्योपासकः महाकविः कालिदासः सौन्दर्यस्य उपासकः। सः शृंगाररसप्रियः अपि। तेन विनिर्मिता सप्तसाहित्यकृतीषु रत्नावली संस्कृतसरस्वत्याः कण्ठे राराजते। तत्र प्रत्येकं कृतौ प्राचीनभारतीयानां प्रसाधननाम् अलंकरणानां च प्राचुर्येण उल्लेखः उपलभ्यते।

कालिदासकालीन–सौंदर्यप्रसाधानाम् अलंकरणानां विवेचनात् पूर्वं किं नाम प्रसाधनम् इति विचारयामः। आधुनिककाले cosmotology इति नाम्ना प्रख्याते प्रसाधनशास्त्रे सौन्दर्यप्रसाधनस्य या परिभाषा वर्तते तस्यां प्राचीन

परिभाषायां च महती समानता दृष्टिपटम् आयाति। आधुनिकशास्त्रं वदति– "cosmetics means an article intended to be rubbed, poured, sprinkled on body either for beautification or protection."[2] इदानी अस्मिन् विषये कविकालिदासस्य ग्रन्थानां प्रसिद्धटीकाकारः मल्लिनाथः किं वदति इति पश्यामः– उत्तरमेघे अलकानगरीवर्णने–

वासः चित्रं मधु नयनयोर्विभ्रमादेशदक्षं
पुष्पोद्भेदं सह किसलयैर्भूषणानां विकल्पान् ।
लाक्षारागं चरणकमलन्यासयोग्यं च यस्या–
मेकः सूते सकलमबलामण्डनं कल्पवृक्षः ।।

इति श्लोकात् पूर्वं संजीवनीटीकायां मल्लिनाथः 'रसाकर' कोशं उदाहरति "कचधार्यं देहधार्यं पधियं विलेपनं चतुर्धा भूषणं प्राहुः स्त्रीणामन्यच्चदैशिकम्"[3] श्लोकेऽस्मिन् अत्र उल्लेखितः चतुर्धा भूषणं नाम मल्लिनाथमतेनं प्रसाधनम्। यतः सः अग्रे टीकायां व्याख्याति "अबलामण्डनं योषित प्रसाधनजातम्"[4]। विषयेऽस्मिन् अन्यशब्देषु यद् यद् मण्डनं तत् तत् प्रसाधनम्। अस्माभिः प्रसाधनम् अलंकरणम् इति भिन्नत्वेन गृहीतं तथापि मल्लिनाथदृष्ट्या तत् एकत्वं भजते। अतः रसाकरे उल्लिखितं चतुर्विधभूषणं आधुनिकप्रसाधनस्य परिभाषापेक्षया कियत् सर्वसमावेशकमस्ति इति अवधार्यम्। अत्र प्रसाधनस्य केशभूषा, देहभूषा, वेशभूषा विलेपनं च इति सूक्ष्मभेदाः कृताः। अग्रे मल्लिनाथः टीकते, "चित्रं नानावर्णं वासः वसनम्। पधियमण्डनम् मधु अनेन विभ्रमद्वारा मधुनो मण्डनत्वमनुसंधेयम्।"[5] नाम मधु अपि कालिदासेन मण्डनरूपेण प्रस्तुतम्। तच्च मण्डनादिवत् देहधार्येऽन्तर्भाव्यम्। "किसलयैः पल्लवैः सह पुष्पोद्भेदम्। उभयं चेत्यर्थ। इदं तु कचधार्यं भूषणानां विकल्पान् विशेषान् देहधार्यमेतत्। तथा चरणकमलयोर्न्यासस्य समर्पणस्य योग्यम्। रज्यतेऽनेनेति रागो रञ्जकद्रव्यम्। चकारः अङ्गरागादिविलेपनमण्डनोपलक्षणार्थः। इदानीं रसाकरकोशगतक्रमानुसारं वयम् एकैकं प्रसाधनं विवेचयामः।

कचधार्यम्– सामान्यतः केशभूषा इति प्रचलितः शब्दः। एषा देहभूषा च द्विधा विभक्तुं शक्यते। प्रथमा नैसर्गिकी। द्वितीया मानवनिर्मिता। नैसर्गिक–केशप्रसाधनेषु पुष्पपल्लवादिनाम् उल्लेखः सर्वत्र लभ्यते। यथा मेघदूते एव प्रसिद्धे श्लोके अलकानगर्याः ऋतुवैभवं निरूपयन् कालिदासः वदति–

हस्ते लीलाकमलमलके बालकुन्दानुविद्धं
नीता लोध्रप्रसवरजसा पाण्डुतामानने श्रीः ।
चूडापाशे नवकुरबकं चारु कर्णे शिरीषं ।
सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनाम् ।[6]

अत्र अलके, चूडापाशे सीमन्ते च पुष्पप्रसाधनानां निर्देशः। चूडापाशे इति शब्देन केशरचनाविन्यासः अपि सूच्यते। तेन केशरचनाविन्यासकला तथैव केशेषु पुष्परचनाविन्यासकला इति कलाद्वयं प्रचलितं स्यात्। अन्यत्र बहुत्र पुष्पाणां केशभूषारूपेण उल्लेखः लभ्यते। मेघदूते एव अलकपतितैः मन्दारपुष्पैः पत्रच्छेदैः कामिनीनां नैशः मार्गः सूच्यते। इति उल्लेखः वर्तते कालिदासस्य 'पुष्पोद्भेदैः सह किसलयैः'[7] इति पदैः पत्रसहितपुष्पाणां उपयोगः क्रियते इति भाति।

साधारणतः कुन्द–कर्णिका–कदम्ब–कुरबक–मल्लिका– मालती–अशोक–केसर–केतकी पुष्पाणां संयोजनं केशेषु क्रियते स्म। यथा ऋतुसंहारे–

मालाः कदम्बनवकेसरकेतकीभिरायोजिताः शिरसि बिभ्रति योषितोऽद्य 2/26

इति शब्देषु अथवा "पुष्पावतंससुरक्षा कृतकेशपाशा"[8] वर्षाकाले नारीकेशभूषा वर्णिताऽस्ति।

शाकुन्तले सखी अनसूया वदति 'कालान्तरक्षमा केसरमालिका नारिकेलसमुद्गते मया निक्षिप्ता मंगलसमालंभम् इति रूपेण।[9] दुर्वाकिसलयमपि केशेषु धार्यते, यथा "विक्रमोवर्शीयम्" इति नाटके[10] विक्रमराजस्य राज्ञीपुष्पाणि। केशपाशेषु मौक्तिकानाम् उपयोगः अपि भवति स्म। यथा पूर्वमेघे अन्तिमश्लोके अलकानगर्याः वर्णने–

"या वः काले वहति मुक्ताजालग्रथितमलकं कामिनी वाभ्रवृन्दम् ।"[11] तथैव ऋतुसंहारेऽपि केशपाशे मौक्तिकानां संयोजनं भवति इति ज्ञायते । केशभूषार्थ यथा पुष्पादीनामुपयोगः क्रियते तथा केशरक्षार्थं तैलादीनाम् उपयोगः क्रियते। तस्य अप्रत्यक्षः उल्लेखः वर्तते । यथा पोषितभर्तृकानां कृते तैलं निषिद्धम् आसीत् अतः सामान्यतः प्रमदाभिः केशेषु तैलं न्यषिच्यत । यथा तैलेन तथा सुगन्धिद्रव्याणां धूपैः केशसंस्कारः क्रियते । अलकानगर्यां यक्ष भवनेभ्यः सुगन्धिधूपः बहिः निर्गच्छति तेन मेघः उपचितवपुः भवति इति यक्षः वर्णयति ।[12] ऋतुसंहारेऽपि

अगरुसुरभिधूमोदितं केशपाशं[13] इत्यादिभिः नैकैः उल्लेखैः धूपसंस्कारस्य प्रचलनं ज्ञायते अयं धूपविधिः अस्मासु काभिः अनुभूतः स्यात् देयधार्यदेहभूषा– शरीरं भूषयितुं कालिदासस्य साहित्ये विविधानां नैसर्गिकभूषणानां सुवर्णभूषञ्च निर्देशः सर्वत्र लभ्यते । शरीरसज्जायां वस्त्रापेक्षया आभूषणानि एव अधिकं महत्त्वं भजन्ते इति प्रतिभाति ।

पुष्पभूषणानि– ऋतुकालोद्भवपुष्पाणां अलंकरणरूपेण प्रभूतं प्रयोगः भवति स्म यथा पुष्पमाला, हारः, कर्णावतंसः इत्यादयः । कर्णभूषणरूपेण पुष्पाणां प्रचुरः प्रयोगः भवति यथा शाकुन्तले प्रस्तावनायां नटी गायति–

ईषदीषच्चुम्बितानि भ्रमरैः सुकुमारकेसरशिखानि ।
अवतंसयन्ति दयमानाः प्रमदाः शिरीषकुसुमानि ।।

मालकाविग्निमित्रे तृतीयाङ्के बकुलावलिका मालविकां वदति–

मुग्धे, भ्रमरसंपातो भविष्यतीति वसन्तावतारसर्वस्वं किं न
चूतप्रसवोऽवतंसितव्यः ।[14]

एवम् आम्रमंजिरी प्रमदाप्रियं कर्णप्रसाधनं स्यात् इति प्रतिभाति । तथैव तत्र 'एषः अशोकपल्लवगुच्छः अवतंसय तावद् एनम्'[15] इति बकुलावलिकावचनेन अशोकपुष्पमपि कर्णभूषणरूपेण प्रयुज्यते स्म इति ज्ञायते 'चारु कर्णे शिरीषं'[16] इति मेघदूते उल्लेखः शिरीषपुष्पस्य प्रमदाप्रियत्वं सूचयति । यथा शिरीषस्य तथा

कमलस्य अपि प्रयोगः भूयते स्म भूषणरूपेण । यथा अलकावधूः हस्ते लोलाकमलं धारयति ।[17] न केवलं अलकावधूः सामान्यश्रमजीविवनिताऽपि पुष्पालंकारं धारयति इत्यस्य उल्लेखः मेघदूते वर्तते ।

गण्डस्वेदापनयनरूजाक्लान्तकर्णोत्पलानां ।
छायादानात्क्षणपरिचितः पुष्पलावीमुखानाम् ।।[18]

ऋतुसंहारे कामिनीनां वर्षाकालीनं कुसुमशृंगारं निरूप्यति कालिदासः शिरसि बकुलमालां मालतीभिः समेतां, विकसितनवपुष्पैर्युथिकाकुड्मलैश्च विकचनवकदम्बैः कर्णपूरंवधूनां रचयति जलदौघः कान्तवत्कालः एषः ।[19]

कनकभूषणानि– कनकभूषणेषु पुरूषः प्रामुख्येन वलयं धारयति । अङ्गुलियकमपि सामान्यभूषणं स्यात् मौलिभूषणं बाहुभूषणं धारयति । रघुवंशे सप्तदशसर्गे कुशस्य बाहुभूषणम् (तस्य नाम नैत्रभूषणं यत् तेन परम्परया प्राप्तम्) जलक्रीडासमये नदीनिमग्नः भवति इत्युल्लेखः लभ्यते । अभिज्ञानशाकुन्तले दुष्यन्तस्य अंगुलियकम्' नाटके अतीव महत्त्वपूर्णं भूमिकां निर्वहति 3/11

विरही अवस्थायां दुष्यन्तः तृतीये अंके वदति– कनकवलयं स्रस्तं स्रस्तं मया प्रतिसार्थते विवर्णमणिकृतम् ।[20] सुवर्णाभरणं रत्नखचितं भवति स्म । कनकवलयभ्रंशरिक्तप्रकोष्ठः[21] इति एतेन विशेषणेन वलयं कनकनिर्मितं भवति स्म इति ज्ञायते । मेघदूते स्त्रीणां वलयस्य त्रिधा उल्लेखः वर्तते पूर्वमेघे वलयकुलिशम्, उत्तरमेघे शिञ्जावलयं कनकवलयं च । शिञ्जावलयं ध्वनिकारणात् काचकंकणं भवितुं शक्यते । देहे विविधस्थानेषु काञ्चीगुणं, मुक्तागुणं उरूप्रदेशे धार्यमाणं मुक्ताजालम्, पादे धार्यमाणं नुपूरम् इत्यादीनाम् आभरणानां स्पष्टः निर्देशः स्थाने स्थाने भवति ।

यथा ऋतुसंहारे–

हारैः सचन्दनरसैः स्तनमण्डलानि,

श्रोणीतटं सुविपुलं रसनाकलापैः ।

पादाम्बुजानि कलनूपुरशेखरैश्च

नार्यः प्रहृटष्टमनसोऽद्य विभूषयन्ति। 3/20

रत्नखचितसुवर्णमौक्तिनाम् अलंकारेण सह पत्रपुष्पाणां साहाय्येनापि नैसर्गिकप्रसाधनं क्रियते स्म। संप्रति केवलं केशेषु पुष्पमालानां ग्रथनं प्रचलितमस्ति, किन्तु प्राचीनकाले जनाः देहमपि पुष्पैः मण्डयन्ति स्म। यथा युवतयः हस्ते कमलं धारयन्ति स्म। अस्माकं सर्वासां देवतानां हस्ते कमलपुष्पम् अस्ति इति तस्याः परम्परायाः प्रतीकं मन्ये। सीमन्ते कर्णेषु च पुष्पाणां प्रयोग प्रचलितः आसीत्। यथा मेघदूते[22] (श्लोक उत्तरमेघ 5) वसन्तसेनया कर्णे कदंबपुष्पं धृतमासीत् कमल–आम्रमञ्जरी अशोकपुष्पगुच्छानां शिरीषादीनाम् उपयोगः कर्णभूषणरूपेण क्रियते स्म। न केवलं संपन्नाः स्त्रियः अपितु श्रमजीविन्यः स्त्रियः अपि पुष्पशृंगारं कुर्वन्ति स्म। यथा मेघदूते 'गण्डस्वेदापनयनरुजाक्लान्तकर्णोत्पलानां छायादानात् क्षणपरिचितः पुष्पलावीमुखानाम्।'[23]

ऋतुसंहारे कामिनीनां वर्षाकालीनं कुसुमशृंगारं निरूपयन् कालिदासः वदति –

शिरसि बकुलमालां मालतीभिः समेतां, विकसितनवपुष्पैर्यूथिका कुड्मलैश्च।
विकचनवकदम्बैः कर्णपूरं वधूनां, रचयति जलदौघः कान्तवत् काल एषः।।[24]

युवती इव युवकाः अपि पुष्पहारान् धारयन्ति। तथा पुष्पैः कर्णं अवतंसयन्ति। यथा कादंबर्याम् ऋषिकुमारः पुण्डरीकः कर्णे पारिजातमञ्जरीं धारयति। एवम् ऋतुकालोद्भवैः स्थलोद्भवैः पुष्पैः शरीरप्रसाधनं क्रियते स्म। तत्र शरीरस्य सुशोभीकरणेन सह सुगंधीकरणम् इत्यपि हेतुः स्यात्।

परिधेयम्– वस्त्रपरिधानस्य गणना यथा मल्लिनाथेन तथा वात्सायनेन अपि प्रसाधनेषु कृता। कामसूत्रे यशोधरस्य वस्त्रपरिभाषायां वस्त्रं शरीरस्य अलंकारसाधनम् अस्ति इत्युक्त्यम्।

देशकालापेक्षया च वस्त्रमाल्याभरणादिभिः शोभार्थं शरीरस्य मण्डनाकाराः।

श्रुतिस्मृतिपुराणेभ्यः तथैव रामायणादिभ्यः आर्षग्रन्थेभ्यः च अभिजात–कथानाटकेभ्यः इदं प्रमाणीभवति यद् मृगाजिनं वल्कलं चीरं ऋषिमुनीनां वस्त्राणि आसन्। ब्रह्मचारी अथवा विद्यार्थी केवलं कटिप्रदेशे वस्त्रं बिभर्ति। गृहस्थाश्रमी अधोवस्त्रं च उतरीयं परिधारयति स्त्रीजनः अधोवस्त्रं स्तनावरणं (कञ्चुकी) उत्तरीयं च धारयति। एतेन विवेचनेन वस्त्रवयनस्य कला प्रगता आसीत् किन्तु प्राचीनभारते सिवनकला अत्यधिका विकसिता नासीत् इति वक्तुं शक्यते।

प्राचीनकाले वस्त्रप्रावरणे वैविध्यमपि दृश्यते। शकुन्तलायाः वल्कलवेषः, विवाहसमये पार्वत्याः वधूवेषः परित्यक्तशकुन्तलायाः विरहवेषः, ऋतुसंहारे कामिनीनां वेषः स्वप्नवासवदत्ते वासवदत्तायाः अवन्तिकावेषः कादम्बर्या महाश्वेतायाः सरस्वत्याः वा वेषः (इत्यादिभिः वेषैः) देशकालप्रसंगानुकुले वर्णाश्रमधर्मानुकुलं वस्त्रपरिधाने वैविध्यम् आसीत्

विलेपनम्–इदानीन्तनकाले प्रसाधनार्थं येषां वस्तूनां समावेशः भवति तेषां कृते प्राचीनकाले 'विलेपनम्' इति संज्ञा आसीत्। संपूर्णप्रसाधनसामग्र्याः केवलम् एकचतुर्थांशः भागः आसीत् सः। अद्य यथा "क्रिम्, पावडर, फेस पॅक, लिपस्टीक" इत्यादीभिः वस्तुभिः विपणीस्थितानि आपणानि च युवकयुवतीनाम् अन्तकरणानि व्याप्तानि तेषां वस्तूनां प्राचीनकालेऽपि प्रभूतः प्रयोगः भवति स्म।

तदा लाक्षारसप्रयोगः सर्वजनसाधारणः। मेघदूते अलकानगर्याः कल्पवृक्षः चरणकमलन्यासयोग्यः लाक्षारसः प्रसाधनरूपेण ददाति।[25] मालविकाग्निमित्रे निपुणिका नृत्यस्पर्धासमये मालविकां सज्जीकरोति तदा लाक्षारसेन चरणौ रञ्जयति।[26] उज्जयिनीनगर्याः प्रसादानां भूमिः स्त्रीचरणांकितैः लाक्षारसैः

रञ्जिताः ।[27] मालविकाग्निमित्रे अग्निमित्रो वदति, वसन्तशोभया स्त्रीप्रसाधनविधेः दूरीकृता ।[28] एव तदानीन्तनकालेऽपि स्त्रीणां प्रसाधनरुचिः वरिवर्ति स्म । प्रसाधनेषु ओष्ठाय लाक्षारसः, मुखाय विशेषकचूर्ण, मस्तकाय तिलकक्रिया, नेत्राय अञ्जनम् इत्यादीनां प्रसाधनानाम् उल्लेखम् अग्निमित्रः करोति,[29] तदानीं स्त्रीजनः वक्षस्थले अथवा सर्वांगे चन्दनं लिम्पति स्म। विलेपनेषु चन्दनेन सह केशरकस्तुरीकालागरूगोरोचनादिनां लेपाः प्रचलिताः आसन् ।

मालविकायाः प्रसाधिका निपुणिका प्रसाधनकलायां निपुणा वर्तते। पार्वत्याः विवाहसमये तस्याः प्रसाधनं तथा अजस्य विवाहसमये अजस्य प्रसाधनं कर्तुं प्रसाधिकाः आसन् । प्रसाधिकायाः अयम् उल्लेखः प्रसाधनकलायाः प्रगतेः परिचायकः इत्यत्र नास्ति शंका ।

सारांशरूपेण यदि कथनीयं चेद् अद्यतनीयं प्राक्तनीयं प्रसाधनमूलम् अभिन्नम् । हेतुः अभिन्नः । केवलं प्रकाराः परिवर्तिताः । प्रस्तुतिः परिवर्तिता । प्रायः सहस्त्रवर्षेभ्यपूर्वं यद् प्रसाधनानां प्रचलनं तदेव परम्परारूपेण परिणतम् । जगति न किमपि नूतनं, प्राचीनमेव नूतनरूपेण चक्रनेमिक्रमेण परिवर्तते ।

प्रसाधनानां एतानि प्रमाणानि यथा साहित्येषु उपलभ्यन्ते, तथा शास्त्रग्रन्थेषु अपि उपलभ्यन्ते । सः स्वतन्त्राभ्यासस्य विषयः । यथा आधुनिककाले प्रसाधनशास्त्रम् इति नूतना ज्ञानशाखा उदिता । तथा प्राचीनकालेऽपि शास्त्रग्रन्थैः स्त्रीपुरुषाणां सौंदर्यरक्षणार्थं वर्धनार्थं च प्रभूतं चिन्तनं कृतमासीत् । यतोऽहि येषां प्रसाधनानाम् उपयोगः कॉस्मेटिक्सरूपेण अद्य क्रियते तेषां सर्वेषाम् उल्लेखः प्राचीनायुर्वेदग्रन्थेषु तथा अन्यग्रन्थेषु यत्र तत्र उपलभ्यते । उदाहरणार्थं बृहत्संहितायां केशरागविधिः कथितः अस्ति । तथैव तंजावर इत्यत्र सर्फोजी राजे इत्येषां सरस्वतीमहाल इति ग्रंथालये प्रसाधनविधौ नैकेः ग्रन्थाः सन्ति । जिज्ञासुभिः ते द्रष्टव्याः ।

निष्कर्षः–

1) साहित्यं कालस्य प्रतिबिम्बम् । कालिदासस्य साहित्ये प्रसाधनानां प्रचुरोल्लेखः भारतवर्षस्य परमवैभवं प्रकटयति ।

2) भारतीयसमाजे संस्कृतौ च परम्परागतस्य अलङ्काराणां महत्त्वस्य मूलम् प्राचीनकाले लभ्यते ।

3) नैसर्गिकालङ्काराणां, विविधपुष्पाभरणानां च उल्लेखः तत्कालीनं समृद्धं पर्यावरणं संकेतयति ।

4) प्रसाधनानां महत्त्वं यौवनकाले, शृंगारकाले, विवाहादिषु मङ्गलप्रसंगेषु च अधिकम् आसीत् ।

5) शालीनता, सुरक्षा, आत्माभिव्यक्तिः च इत्येतेषां प्रकटीकरणार्थं साधनभूतानि प्रसाधनानि ।

6) अलङ्काराः सुवर्णमयः, मौक्तिकमयः, रत्नजडितः इति उल्लेखः अतः भारतभूमिः प्राचीनकालादेव सुवर्णरत्नमौक्तिकानां प्रभावात् सुवर्णखन्युद्योगः, रत्ननिर्माणोद्योगः, मौक्तिकनिर्माणोद्योगः तथा च अलंकारनिर्मितिकला परमोत्कर्षतां गताः इति प्रमाणीभवति ।

7) प्रसाधनरुचिः भारतीयानां सौदर्यदृष्टिं कलासक्तिं च द्योतयति ।

8) अद्यतनीय स्त्रीणाम् अलंकाररूचिः सुवर्णाकर्षणं च प्रसिद्धः तस्य मूलं कियत् प्राचीनम् इति एतेन अवगम्यते । प्रायः भारतीयस्त्रीणां जीवाणुषु सुवर्णाकर्षणं परम्परयागतम् इति वदामः चेद् नातिशयोक्तिः ।

संदर्भसूची

1) स्वप्नवासवदत्तम् अङ्कः 1
2) Page No. 23, Harry's cosmetology, Wilkinson & Moore
3) उत्तरमेघः श्लोकः 11
4) तत्रैव
5) तत्रैव
6) तत्रैव उत्तरमेघः 8
7) तत्रैव 2/26
8) तत्रैव 2/20
9) शाकुन्तलम् अङ्कः 4, पृ. 84

10) विक्रमोर्वशीयम् अङ्कः 3,
11) पूर्वमेघः श्लोक 61
12) पूर्वमेघः श्लोक 32
13) ऋतुसंहारः 5/12
14) मालाविकाग्निमित्रम् अङ्कः 3
15) तत्रैव
16) उत्तरमेघः 8
17) तत्रैव
18) पूर्वमेघः 43
19) ऋतुसंहारः 2/24
20) रघुवंशम् सर्गः 17
21) पूर्वमेघः 2
22) उत्तरमेघः 11
23) पूर्वमेघः 38
24) ऋतुसंहारः 2/24
25) उत्तरमेघः 11
26) मालाविकाग्निमित्रम् अङ्कः 3/23
27) पूर्वमेघः 32
28) मालाविकाग्निमित्रम् अङ्कः 3/5
29) तत्रैव

संदर्भग्रन्थसूची

1. कौटिलीय अर्थशास्त्रम् संपा. हरिनारायण शर्मा, चौखंबा प्रकाशन, प्र. आ. 1952
2 ऋग्वेदः – चौखंबा प्रकाशन, वाराणसी, द्वि. आ. 1964.
3. ऋतुसंहारः – संपा. डॉ. राजकिशोर, त्रिपाठी, प्रकाशन केंद्र, लखनऊ, प्र. आ. 1962
4. कामसूत्रम् –(वात्सायनकृत) मोतीलाल बनारसीदास तृ. आ. 1971.
5. कुमारसंभवम्– चित्रशाळा प्रकाशन, द्वि. आ. 1930.
6. कादंबरी (बाणभट्टकृत) संपादक डॉ. विमल पवनीकर, प्रसाद प्रकाशन, प्र. आ. 2005.
7. भरतमुनींचे नाट्यशास्त्र – गोदावरी केतकर, पॉप्युलर प्रकाशन, द्वि. आ. 1963.

8. मेघदूतम्– संपा. रा.रा. किंजवडेकर, चित्रशाळा प्रकाशन, द्वि. आ. 1958.
9. मालविकाग्निमित्रम्,–संपा.एम. आर. काळे, महेंद्र ए. सेठ अॅण्ड कं. मुंबई, प्र.आ. 1966.
10. महाभारत, भांडारकर प्राच्य विद्या संशोधन मंदिर, पुणे, 1929.
11. मृच्छकटिकम्, संपा. डॉ. विजया रा. जोशी, सुयोग प्रकाशन, नागपूर प्र.आ.2010.
12. रामायणम्, गीताप्रेस, गोरखपुर, तृ. आ. संवत्, 2033.
13. रघुवंशम् – संपा. बोरवणकर, चित्रशाळा प्रकाशन, प्र.आ. 1958.
14. विक्रमोर्वशीयम्–संपा. एम. आर. काळे, महेंद्र ए. सेठ अॅण्ड कं. मुंबई–2, प्र. आ. 1968.
15. शाकुंतलम् – संपा. रा. श. वाळींबे, मेसर्स जोशी लोखंडे प्रकाशन पुणे, प्र. आ. 1968.
16. कालिदास और उसकी काव्यकला, विद्यामार्तंड विद्यालंकार, मोतीलाल बनारसीदास, वाराणसी
17. अमरकोषः – संपा. वासुदेवशास्त्री ल. पणशीकर, निर्णयसागर प्रे. मुंबई 1940 (प्र. आ.) द्वि. आ., 1980चौखम्बा प्रकाशन वाराणसी.
18. कुमारसंभवम्, डॉ. अंशुमती दुनाखे, प्रसाद प्रकाशन, पुणे, प्र. आ.2012.
19. भैषज्य रत्नावली, सं. चौखम्बा संस्कृत सीरीज, वाराणसी संवत् 2018
20. गन्धसार
21. गन्धवाद
22. भारत भैषज्य रत्नाकर
23. हरमेखला
24. वराहमिहिरकृत– बृहत्संहिता
25. अग्निपुराण
26. विष्णुधर्मोत्तरपुराण
27. Panchtrantra M. R. Kale, Motilal Banarasidas F. E. Delhi, 1986.
28. Harry's cosmetology, Wilkinson & Moore, Chemical publishing Co., Newyork, 7th edi. 1982.
29. Harshacharita by Banbhatta-P. V. Kane, Motilal Banarasidas, Varanasi 2nd Edition, 1965.
30. Ritusamkaram of Kalidas – M.R.Kale, Motilal Banarasidas, Varanasi 2nd Edition, 1986.

मृच्छकटिके समाजशास्त्रदर्शनं रूढयस्तथाऽचारविशेषाः।

डॉ. परिणीता देशपांडे

वैदिककालात् प्रवर्तितेषु शास्त्रेषु समाजशास्त्रमेकमद्वितीयं स्थानमलङ्करोति। समाजविषयकं शास्त्रं समाजशास्त्रम्। विशालपरिसरमिदं समाजशास्त्रं तत्र स्वल्पमात्रक्षेत्रे एवास्मिन् निबन्धे अस्माभिरालोच्यम्। आदौ ज्ञातव्यं समाजशास्त्रेण किं प्रयोजनमुत वा कथं वास्य प्रवृत्तिरिति। समाजस्य हितार्थमेव सर्वस्य शास्त्रस्येव समाजशास्त्रस्योपक्रमः। समाजमधीत्य समाजशास्त्रं मानवसमूहानां स्वास्थ्याय किं योग्यमथवा अयोग्यमिति प्रतिपादयति। साहित्ये तु एतत् प्रत्यक्षतया न शक्यं तस्य शास्त्रभिन्नत्वात्। परमेतत् परोक्षतया भवितुमर्हति। कथमिति चेत् साहित्यं यथा समाजस्याभिन्नमङ्गं तथा तद्रचयिता कविरपि समाजस्यैवांशः। तस्मात्कल्पितेऽपि साहित्यकृतौ जीवनस्य समाजस्य च तथैव समाजशास्त्रेणाधीयमानानां विषयाणां च प्रतिबिम्बमवश्यं भवितुमर्हति। नात्रापवादः शूद्रकस्य मृच्छकटिकस्यापि यत्र समाजस्य शब्दचित्रं वैपुल्येन प्रपञ्चितम्। तेनैव समाजशास्त्रदृष्ट्या संज्ञापनपरिपूर्णं सन्दर्भपरिप्लुतं मृच्छकटिकमतीव महत्त्वमावहति संस्कृतसाहित्ये च विलक्षणं स्थानमधिरोहति।

विदितमस्ति सुविदुषां यन्मृच्छकटिकं नाम रूपकेष्वन्यतमं संकीर्णं 'प्रकरणं' यत्र औत्पत्तिकं कथावस्तु, नायकः दरिद्रब्राह्मणश्रेष्ठी, गणिकानायिका अन्यान्यपि पात्राणि समाजस्य निम्नस्तरादागतानि। नितरां परिप्लुतं दृश्यते। नात्र कोऽपि राजकीय प्रेमप्रसंगः नापि यातयामा साङ्केतिकता कृत्रिमं वा पर्यावरणम्। प्रकरणेऽस्मिन् मालवप्रदेशान्तर्गत – शिप्रानदीपूर्वतीरस्थाऽवन्त्य पराभिद्योज्जयिनीवास्तव्ययोः वसन्तसेनाचारुदत्तयोः परस्परानुरागो निपुणतरं वर्णितो वरीवर्ति। (प्रकरणस्य कृते साहित्यदर्पणे पश्यन्तु 6.224.224; दशरूपके च 3.39.42)

ब्राह्मणानां श्रेष्ठत्वम् –

मृच्छकटिककालीनसमाजे वर्णाश्रमव्यवस्था सुदृढमूला दृग्गोचरा भवति। उपलब्धेष्वपि क्षत्रियवैश्यैः स्वाधिकारेषु ब्राह्मणेषु विशेषाधिकारवितरणं, वर्णव्यवस्थायाः जातिव्यवस्थायां सङ्क्रमणं संसूचयति। ब्राह्मणान् प्रति नितान्तादरः गवां च पावित्र्यमस्याः व्यवस्थायाः व्यवच्छेदकं लक्षणमस्ति यन्मदनोरप्याभिमतम् (मृ.9.39)। अत्र अनतिक्रमणीया भगवती गोकाम्या ब्राह्मणकाम्या च (तत्रैव 3,17,18)। समीहतिसिद्धये ब्राह्मणः एवाग्रे क्रियमाणः दृश्यते (तत्रैव 10.57.27)। वेदाध्ययनार्थं तेषामप्रतिहताधिकारः तथैव शूद्राणां निषेधञ्च (तत्रैव 10.21)। ब्राह्मणधर्मस्याधिकृतं प्रतीकं यज्ञोपवीतं सर्वथैव प्रतिष्ठापदवीमारूढं दृश्यते।

यज्ञोपवीतं नाम अमौक्तिकमसुवर्णं ब्राह्मणानां विभूषणम्, देवतानां च पितृणां च भागो येन प्रदीयते।। (10.10) एतदेव यज्ञोपवीतं चारुदत्तेनान्ते स्वपुत्राय समर्प्यते, कुलाचारपरम्परासातत्यनिदर्शकम्। यद्यपि पुत्रेषणा नैसर्गिकी तथापि 'परलोकार्थं पुत्रमुखदर्शनं' (तत्रैव 10.19.9) विचारोऽयं ब्राह्मणधर्मस्य प्रभावं दर्शयति। किन्तु व्यवसाय–स्वतंत्र्यं तु न वर्णाधिष्ठितम्। ब्राह्मणोऽपि चारुदत्तः व्यवसायेन श्रेष्ठी नापितोऽपि वीरकः चर्मकारोऽपि चन्दनकः सेनापतिपदं भूषितवन्तौ। चाण्डालपात्रमिषेण शूद्रवर्णस्य चित्रणमुपलभ्यते। चाण्डालस्तु शूद्रपितृब्राह्मणजनन्याश्च सन्तानः, क्रूरकर्मा, पापिनां शूलारोपनाय नियुज्यते स्म। सः पापमपराधिनां राजदण्डं च विवरणपुरस्सरं घोषयति। किन्तु न सः बद्धवाक्। स्वयं निर्भीकतया स्वमतं व्यनक्ति शकारविषये राजविषये च (मृ.10.39)। सः सह्यवासिनीं देवीं चारुदत्तमोक्षणार्थं प्रार्थयते। परं तस्येमे शब्दाः 'न खलु वयं चाण्डालाश्चाण्डालकुले जातपूर्वा अपि' चाण्डालानां हीनस्थाननिदर्शकाः समाजे। तत्रैव समाजेऽप्रतिष्ठितानां विटचेटमणिकानां शूद्रनरनारीणां तथा निष्क्रयेण मोक्षणं (मृ.4.4.4.21;10.58.31)निखिलसमाजमान्यं 'गर्भदास,गर्भादासि' आभ्यां सम्बोधनप्रयोगैः निर्दिश्यते। एवं दास्यप्रथा समाजे रूढिमभजत्।

धर्मस्वरूपम् – सनातनविधिप्रधानवैदिकधर्मस्य दर्शनं मृच्छकटिके भूयिष्ठं विलसति । यज्ञवाद–यज्ञमण्डप–यूपादीनां तथा वैदिकमन्त्रघोषपावित्र्यनिदर्शकैः समुल्लेखैः तस्य महत्त्वमनुमीयते । वधस्तम्भं नीयमानः चारुदत्तः, आत्मानं यज्ञीयपशुवत् परिकल्पते (मृ.10.21) । सत्यपि इन्द्ररुद्रयोर्निदेशे, रुद्रशिवसमन्वयः तथा च इन्द्रपूजनादि समहोत्सवं प्रचाल्यमानस्य इन्द्रध्वजस्य लोकप्रियता स्फुटं प्रतीयते (मृ. 6.27) । कार्तिकेयस्य महत्त्वं वर्धिष्णु ज्ञायते रुद्रस्य केवलं तस्य पितारूपेण स्मरणात् । सः च कार्तिकेयोऽपि गृहभेदनविद्यायाः अधिष्ठातृदेवतारूपेण सुप्रतिष्ठितः ।

प्रतीकपूजनं तथा मूर्तिपूजाप्रथा वैदिकविधीन् अतिरिच्य समाजे सुविहिता प्रतिभाति स्थाने स्थाने मन्दिरनिर्देशात् । उज्जयिन्यां वसन्तसेनायाः च प्रसादेऽपि द्वे कामदेवायतने वर्णिते शूद्रकेण । तथैव कतिपयमन्दिरनिर्माणे श्रेष्ठिदत्तानि धनानि निर्दिष्टानि । (मृ.9.22) द्यूतकारप्रवेशे, द्यूतकारः स्वात्मानं मन्दिरे मूर्तिस्थाने स्थापयित्वा गोपयति । अत्रैव पाषाणकाष्ठनिर्मितानां मूर्तीनामपि समुल्लेखाः प्राप्यन्ते ।

गृहदेवतापितृभ्यः बलिसमर्पणं (मृ.1.16) पितृभ्यस्तिलोदकदानं (10.7.30), वसन्तसेनया दैनिकपूजा निर्वहणार्थं ब्राह्मणनियोजनं,पूजावशेषस्य प्रसादरूपेण ग्रहणमित्यादयः सर्वे लौकिकधर्माचाराः जनेषु रूढिं भजन्ति स्म ।

सत्यपि सनातनवैदिकविधिप्रधानधर्मे चार्वाक–बौद्धादीनामवैदिकानामपि सहास्तित्वमनुमीयते । विशेषतः बौद्धधर्मस्य प्रभावः दरीदृश्यते बौद्धभिक्षुपात्ररूपेण । भिक्षूणां काषायवस्त्राणि परिधारणपद्धतिश्च, जनेतरानुदिश्य तैः प्रयुक्तं 'बुद्धोपासक' इति सम्बोधनं, तेषां दण्डकुण्डिकाभाजनानि स्त्रीसंसर्गपरिहरणं,संवाहकस्य बौद्धमतस्वीकरणं पुष्पकरण्डकोद्यानसमीप एव बौद्धविहारस्यास्तित्वं चैतैः बौद्धधर्म–प्रगतावस्था प्रसारश्च स्फुटमनुमीयते । चरमेऽङ्के भिक्षुसंवाहकः उज्जयिन्याः विहाराधिपतिस्थाने नियुज्यते नृपेण । प्रसङ्गेनानेन धर्मसंस्थाप्रमुखपदनियुक्त्यां

राजाधिकारित्व संसूच्यते । साम्प्रतमपि शङ्कराचार्याणां मठाधिपति–पदनियुक्तिरपि राज्यशासनाधीना भवति । एवं सत्यपि बौद्धधर्मलक्षणीयास्तित्वे तस्यैव काचिदप्रतिष्ठापि ध्वन्यते ' गणिका हस्ती कायस्थो भिक्षुःचारो रासभश्च यत्र एते निवसन्ति तत्र दुष्टा अपि न जायन्ते (मृ.5.7.9)' अथवा कथम् अभिमुखमनभ्युदयिकं श्रमणकदर्शनं (मृ.7.7.9.1) एतादृशैः निन्दाव्यञ्जकवचनैः । तत्तुलनया ब्राह्मणधर्मस्यैव दृढतरप्रभावः समाजप्रकृतौ इत्यपि अनुमातुं शक्यते । धर्मस्य व्यामिश्रस्वरूपं च समाजे प्रतिभाति शीर्षक–नारीणां स्थानम् किमाश्चर्यतादृशे पुरुषप्रधाने समाजे नारीणामपि अधःस्थितिः भवति चेत् । केवलं विवाहितानामेव नारीणां प्रतिष्ठा, सापि विवाक्षितमर्यादायामेव आर्याधूतायाः चित्रणे दृश्यते ।

तत्प्रतिष्ठाप्राप्त्यर्थमेव वसन्तसेना मदनिकादयः गणिकाः परिणेतुमिच्छन्ति परं नः तत्सुकरं यथा शर्विलकः वदति मदनिकां 'ते दुर्लभं प्राप्तं वधूशब्दावगुण्ठनम्' (मृ. 4.24) इति चारुदत्तस्य वधूधूता आदर्शपत्नीप्रतिमा तथापि न एतदपि वधूस्थानं समानताप्रदं बहुपत्नीकत्वरूढिकारणात् नारीणां स्थानं सदैव अवरमेव दृश्यते । पतिमात्रधार्मिण्यास्तस्याः पतिरेव अलङ्कारः । पतिं विना तस्याः प्रतिष्ठायाः मर्यादितावकाशः नापि स्वतन्त्रमस्तित्वम् । 'स्त्री तावत्संस्कृतं पठन्ती दत्तनवनास्येव गृष्टिः अधिकं सुसूशब्दं करोति (मृ. 3.3.9) इति वचनैः स्त्रीणां संस्कृतपठनमपि उपहास्यतां नीतं दृश्यते । शृण्वन्तु नारीविषये इमे अनुदारशब्दाः–

अयं हि सुरतज्वालः कामाग्निः प्रणयेन्धनः ।
नराणां यत्र हूयन्ते यौवनानि धनानि च ।।

स्त्रीषु रागः न कार्यो रक्तं पुरुषं स्त्रियः परिभवन्ति ।
रक्तैव हि रन्तव्या विरक्तभावा तु हातव्या ।। (मृ. 4.11,13)

उद्वेगकरं खेदजनकमेतद्वचनं मनुवचनस्मारकं च । गणिकानां तु विडम्बनायाः न कोऽपि अन्तः । वेश्या श्मशानसुमना इव वर्जनीय, (4.14); न वेशजाताः शुचयस्तथाङ्गनाः (4.17); गणिका नाम पादुकान्तरप्रविष्टेव लेष्टुका

दुःखेन पुनर्निराक्रियते (5.7.9) किं बहुनोक्तेन? वस्तुतस्तु पुरुषः एव निमित्तकारणं तासामेतादृशावस्थायाः।

समाजे पुरुषप्राधान्यम् एतावद्बलवद् यत्सत्यपि बहुपत्नीकत्वे, पुरुषाणां विवाहबाह्यसम्बन्धाः प्राभिमताः तेषां च अनौरससन्ततिरपि 'बन्धुल' इति नाम्ना स्वीकृता दृश्यते। (तत्रैव 4.25)

दिष्ट्या स्त्रीणां प्रेमविवाहस्य स्वातन्त्र्यं तावदबाधितं ध्वन्यते कथावस्तुना। अग्निं साक्षीकृत्य (4.2) मृङ्गलपटहध्वनिसङ्गतवरवस्त्र–रक्तमालायुक्तस्य विवाहमङ्गलस्योद्वाहस्य प्रथा तदानीं समाजे दृढमूला ध्वन्यते (मृ. 10.40)। तथैव आर्याधूतायाः चितायामात्मसमर्पणसिद्धतानिर्देशेन सतीप्रथायाः अस्तित्वमनुमातुं शक्यते। (तत्रैव 10.57.16)

न्यायव्यवस्था–

मृच्छकटिके न्यायव्यवस्थायाः एतादृशं सुविपुलं संज्ञापनं प्राप्यते यत्तस्य अनध्ययनाद् वञ्चिताः स्याम समाजशास्त्रस्य महत्वपूर्णादङ्गात् वास्तवाच्च। प्रकरणस्यास्य नवमदशमौ चरमाङ्कौ समीचीनतया तत्कालीनन्यायव्यवस्थां द्योतयन्ति। न्यायदानप्रक्रियायाः कृते तदानीं 'व्यवहारः' तथा नियमानां च कृते 'व्यवहारपदम्' इति शब्दौ प्रयुज्येते स्म। चारुदत्तस्य व्यवहारः' दूर्वा–चत्वरयुक्ते विशाले अधिकरणमण्डपे निर्व्यूढः यत्र न्यायपरिभाषा प्रयुक्ता। तत्र प्रेक्षकाः 'वेशिकाः', न्यायाधिकारिणः'अधिकरणभोजकाः न्यायाधीशः अधिकारगणिकः तत्सहायकः शोधनकः श्रेष्ठीकायस्थप्रभृतयः न्यायमण्डलसदस्याः राजनियोगेन नियुक्ताः। अधिकरणिकः केवलं निर्णये प्रमाणं शेषे तु राजा (तत्रैव 9.38.21)। न्यायदाने राज्ञः प्रभुता यत्र केवलं लिखितप्रमाणमाधिकृतं गण्यते। तत्र द्वौ पक्षौ व्यवहारार्थी (Painfiff) तथा प्रत्यक्षार्थी च (defendent)। पृच्छाप्रतिपृच्छाभिः सत्यवृत्तस्य प्रकाशने एव कार्यभारः विहितः आसीत्।

इमौ चात्र लोकौ–

व्यवहारः सविघ्नोऽयं त्यज लज्जां ह्रदि स्थिताम्।
ब्रूहि सत्यमलं धैर्यं छलमत्र न गृह्यते।। (10.18)

सत्येन सुखं खलु लभ्यते सत्यालापे न भवति पातकम्।
सत्यमिति द्वे अप्यक्षरे मा सत्यमलीकेन गूहय।। (10.35)

न्यायाधीशस्य कृते आवश्यकाः गुणाः शूद्रकेन अभिमताः अधः निर्दिश्यन्ते–

शास्त्रज्ञः कपटानुसारकुशलो वक्ता न च क्रोधन–
स्तुल्यो मित्रपरस्वकेषु चरितं दृष्ट्वैव दत्तोत्तरः।

क्लीबान्पालयिता शठान्व्यथयिता धर्म्यो न लोभान्वितो
द्वार्भावे परतत्त्वबद्धह्रदयो राज्ञश्च कोपापहः।। (9.5)

अत्राधिकं भाष्यमनावश्यकमिति मन्ये। चत्वारः अपराधाः शूद्रकेण निर्दिष्टाः ये द्यूत–ऋणस्य अनिष्कृतिः, नारीहत्या, राजनियोग–व्यत्यय–निर्माणम्, अमित्रसाहाय्यं च। एतदर्थं प्रायः मनुप्रणीतदण्डविधानपद्धतिरेव अवलम्बिता दृश्यते (तत्रैव 9.39)। कठोरातिकठोराः शरीरदण्डाः पुरस्कृताः दृश्यन्ते (10.54)। अपराधिनः अपराधस्य नगरचत्वरेषु उद्घोषणं, करवीररक्तपुष्पमालाधृतस्य सडिण्डमताडनयात्रस्य तस्य वधस्तम्भनयनमेतादृशः सनिकारदण्डः प्रचलितः आसीत्। एवं खिस्ताब्दस्य षष्ठेऽपि शतके न्यायव्यवस्थायाः प्रगतिः न्यायदाने च निष्पक्षपातव्यवहारादयः ज्ञातुं शक्यन्ते मृच्छकटिकस्य अध्ययनेन।

जनविश्वासाः–

यस्य कस्यापि धर्मस्य लौकिकं सर्वजनसामान्यस्वरूपं जनविश्वासेषु दरीदृश्यते यत्तत्समाजमपि अभिव्याप्य प्रतिष्ठते। ह्रदयस्पन्दनं, नेत्रस्फुरणं, ग्रस्तोदित–सूर्येण महापुरुषनिपातसूचनं, काकसर्पयोर्दर्शनं, पक्षिक्रन्दनं गोप्रसूतिः, महामृत्युः, उल्कापातः (मृ.10.7,11,12,13)एतान्यशुभसूचकशकुनानि

अत्र तत्र विकीर्णानि मृच्छकटिके। ग्रहगोलानां मानवजीवने प्रभावस्य ज्ञापनं जन्मपत्रिका विधानेन रूढिमभजत (मृ.10.33, 6.9.10)। तथा च दैववादस्यापि प्रभावः महत्तरः प्रतिभाति। प्रकरणस्यास्य प्रस्तावनायामेव शूद्रकेण 'भवितव्यता' दर्शनार्थं प्रतिज्ञातम्। चारुदत्तस्य सीदनं, शकारस्य विलसनं, चाण्डालहस्ते कालपरशुधारणं, निगडपाशेन आर्यकस्य बन्धनागारे प्रेषणं मोक्षश्च सर्वाण्येव दैवस्य विचित्राणि विचेष्टितानि। पुरुषभाग्यानामचिन्त्याः खलु व्यापाराः (मृ.10.4.6) अत्र क्रीडति कूपयन्त्रघटिकान्यायप्रसक्तो विधिः (10.60) एवं सत्यपि दैववादे जनमानसे, सत्यमेवान्ते जयते इत्यापि जनविश्वासः गोचरीभवति।

अन्येऽपि च सुकृतदुष्कृतपरिणामरूपः परलोकः कर्मविपाकवादः, पुनर्जन्मविश्वासः चेटस्यापि अकार्यपरिहार (मृ.8.23), दिग्देवतानामपि मानवकर्मसाक्षिभावत्वं (8.24) प्रियवचनसोपदानश्रवणं, सुतः नाम नृणां लोकान्तरस्थानानां देहप्रतिकृतिः (4.42)– इत्यादयः जनविश्वासाः प्रतिबिम्बिताः मृच्छकटिके येन पापभीरुसमाजस्य चित्रणं याथातथ्येन भवति।

व्यवसायाः वाणिज्यं च –

कृषिकार्यस्य प्राचीनत्वं भारते सुविदितमेव। अत्रापि उज्जयिन्यां यवानां कलम–केदार–शालीनाम् असकृत्समुल्लेखैः कृषिकर्मणः अस्तित्वमनुमीयते (मृ.4.17) तत्रैव ऊषरक्षेत्रपतितस्य निष्फलबीजमुष्टेः तथा अनावृष्टिहते सस्ये द्रोणमेघस्य च (10.26) उपमाभ्यां क्षेत्रकराणां दुष्करमस्थिरं च जीवनं तदानीन्तनमपि ज्ञायते। अत एव उज्जयिन्याः स्फीतसमृद्धेः मूलमस्ति वाणिज्यं बहुविधम्,यद् भूजलमार्गैः प्राचलत्। सुदूरवर्तिनगराद्युवव्यवसायिनः नानापण्यपणनार्थं तत्रागताः दृश्यन्ते यथा संवाहकः पाटलीपुत्रात्। गृहपति–सार्थवाह–श्रेष्ठि–सवृत्तिपरिचारकैः सङ्कुला एषा नगरी (2.15.6) यत्र व्यवसायिनां विशेषनिवासव्यवस्था श्रेष्ठिचत्वरे क्रियमाणा दृश्यते। कुसुमपण्यकराः नापित–चर्मकार–तक्षक–वास्तुकार–कुम्भकार–संवाहकाः सुविपुलं निर्दिष्टाः। वसन्तसेनायाः प्रासादतुल्यहर्म्यस्य सविस्तरं वर्णनं चतुर्थे

अङ्के तथा अन्यान्यपि लोकभवनवर्णनानि वास्तुशास्त्रस्य सुतरां प्रगतावस्थां दर्शयन्ति। आरामप्रासादवेदिका–बालाग्रप्रतोलिका–प्राकारप्रतोलिका–पक्षद्वार–चतुःशालक–आलिन्दक–गवाक्ष–प्रकोष्ठ–गुल्मस्थान–एतादृशं वास्तुवैविध्यं लक्षणीयम्। द्यूतक्रीडा न केवलं लोकप्रियमनोरञ्जनस्य साधनमपि तु धनप्रदव्यवसायः। तदर्थं क्रीडा–गृहाणि, मद्यमन्दिराणि, अक्षगृहाणि चारक्षितानि। द्यूतगृह–प्रमुखः सभिकस्तथा नियमयापनार्थं द्यूतकारमण्डली राजनियुक्ता अभूत्। तनैव सुप्रतिष्ठितः अयं व्यवसाय दृश्यते तदानीम्। त्रेता–पावर–नर्दित–कटाः एतानि अक्षनामानि निर्दिष्टानि (मृ.2.9)। बहुलीभूतेषु व्यवसायिषु'अकन्दसमुत्थिता पद्मीनि, अकचको वणिक् अचौरः सुवर्णकारः अकलहो ग्रामसमागमः अलुब्ध गणिकेति दुष्करमेते सम्भाव्यन्ते' (5.6.15) एतादृशानामवधारणानां प्रादुर्भावः समाजे स्वाभाविकः दृश्यते।

सुवर्णकारस्य व्यवसायस्तु उत्कर्षस्य परां कोटिमवाप्तः प्रतीयते। विविधानि सुवर्णाभरणानि नुपूर–कटक–कुण्डल–हाराः, भाण्डानि करण्डकानि तत्र खचितानि वैदूर्य–प्रावालक–पुष्पराग–इन्द्रनील–कर्केतर–पद्मराग–मरकत–इत्यादीनि अनर्घ्यरत्नानि असंख्यातानि समुल्लिखितानि। येन उज्जयिन्याः ऐश्वर्यसम्पन्नता सलीलं दृष्टिपथमायाति।

तत्कालीनसमाजे घटितायाः राज्यक्रान्ते रुपकथावस्तुरूपेण राज्यव्यवस्थायाः संज्ञापनमपि भवति राजाधिकारिषु प्रधानदण्डधारकः, तन्त्रिलः, नगररक्षाधिकृतः बलपतिः, महत्तरः, राष्ट्रियः – एतेऽधिकारिणः विधिनियमानां पालनार्थं नियुक्ताः आसन्।

साङ्गवेदाध्ययनं धर्मशास्त्रं, गणितशास्त्रं, ज्योतिषं,हस्तविद्या, वैशिकी–कला नाम सङ्गीत–नृत्य–नाट्य–चित्र–इत्यादयः विषयाः अध्ययने अन्तर्भूताः (5.5)। पुराणानां रामायणमहाभारतानां तु सन्दर्भाः भूरि वर्तन्ते यैः तेषां महत्त्वं समाजे प्रचलनं च स्फुटीभवति।

वस्त्रेषु नार्यवगुण्ठनमुत्तरीयं, स्नानशाटी, प्रावारकः कौशेयं पट्टप्रावारकः, लम्बदशाः, चीवराणि, यानास्तरणमित्यादीनि उद्धृतानि। आहारे मांस–मत्स्य–तण्डुल–भक्त–गुडोदन–कलमोदन–पायस–सालीयकुर– घृत–दधि– शाकसूप–अपूपक–मोदकानि अन्तर्भूतानि। मांसाहारः सर्वजनसामान्यं (मृ.8.28)। सुरा–मद्य–आसव–सिन्धु एतानि पेयानि। व्यञ्जनेषु हिंगु–जीरक–भद्रमुस्त–वचा–शुण्ठी–मरीच चूर्ण–रक्तमूलक प्रसिद्धानि उपयुज्यते। अन्नसर–क्षणस्य पद्धतयः अपि जनावगताः यथा–

कूष्माण्डी गोमयलिप्तवृन्ता शाकं च शुष्कं तलितं खलु मांसम्
भक्तं च हैमन्तिकरात्रिसिद्धं लीनायां च वेलायां न खलु भवति पूति।।(1.51)

अपि च मधुरस्वरार्थं द्वे मिश्रणे कथिते –

हिङ्गूज्ज्वलं दत्तमरीचचूर्णं व्याघारितं तैलघृतेन मिश्रम्।
भुक्तं मया पारभृतीयमांसं कथं नाहं मधुरस्वर इति।।

अपरं च

हिङ्गूज्ज्वलं जीरकभद्रमुस्ता वचाया ग्रन्थिः सगुडा च शुण्ठी।
एषा मया सेविता गन्धयुक्तिः कथं नाहं मधुरस्वर इति। (मृ.8.13,14)

सकर्पूरताम्बूलभक्षणस्यापि प्रथा रूढिमभजत् (4.28.21)

उत्सवेषु विवाहमङ्गलमिव पुत्रजन्मोत्सवः, मदनोत्सवः वसन्तोत्सवः इन्द्रध्वजोत्सवश्च प्रमुखाः। (10.23,27) एवं संस्कृतसाहित्ये प्रायः अनुपलभ्यमानं जनसामान्यानां समाजस्य दिग्दर्शनं मृच्छकटिके सुवैपुल्येन भवति। भिन्नस्तरादागतपात्रपरिपूर्णस्यापि मानवभावान्वितस्य, स्खलनशील–स्यापि प्रगतिमानस्य, कलहायमानस्यापि सत्यप्रियस्य, सुखविलासैश्वर्य–समृद्धस्यापि चौर्यकर्मोद्युक्तस्य, अनधीतस्यापि अनुशासनप्रियस्य दैवाहतस्यापि मधुरशीलस्य समाजस्य विशालपटः मृच्छकटिके ओतप्रोतः दृश्यते। शूद्रकस्य कालः खिस्ताब्दस्य प्रायः षष्ठं शतकमिति यद्यनुमतं चेत्, तर्हि तत्कालीन–

समाजस्य यथायथं विज्ञापनं मृच्छकटिके यद् भवति तद् समाजशास्त्रजिज्ञासूनां कृते नितरां रञ्जकं भवति। डॉ. गो.के. भट वरेण्यैस्तु एतस्य प्रकरणस्य' ट्रान्सक्रिप्ट फ्रॉम लाईफ (प्रीफेस टू मृच्छकटिक पु.14) अर्थात 'जीवनस्य लिप्यन्तरम्' इति शब्दैः गौरवं कृतम्।

अन्ते, मृच्छकटिके समाजलतानाट्यकथावृक्षसंश्रिता स्वपुष्पफलादिभिः अभ्यासकान् भूयिष्ठं चिरं प्रभावयति इति पुनरेकवारं प्रतिपाद्य विरमामि।

ग्रन्थसूचिः –

1. करमरकर, आर्.डी., मृच्छकटिक ऑफ शूद्रक, द्वितीयावृत्तिः पूना, 1950
2. कीथ, ए.बी., दि संस्कृत ड्रामा, ऑक्सफर्ड युनिव्हर्सिटी प्रेस 1924
3. गोडे, पी.के.,स्टडीज इन द हिस्टरी ऑफ ताम्बुल, दि पुना ओरिएन्टालिस्ट, व्हॉ.14, नं 1–4, 1949
4. जहागीरदार आर. व्ही.,ड्राम इन संस्कृत लिटरेचर, पॉप्युलर बुक डेपो, बॉम्बे 7,1947
5. परांजपे व्ही. जी. मृच्छकटिक आवृत्ति, पूना 1937
6. पुसाळकर, ए.डी. भास ए स्टडी
7. भट, जो. के., प्रीफेस टू मृच्छकटिक, अहमदाबाद, 1953
8. भरत; नाट्शास्त्र, गायकवाड ओरिएन्टल् सिरीज, काशी संस्कृत सिरीज, बनारस, 1929
9. मंकड, डि. आर.; एन्शन्ट इंडियन थिएटर, चारुतर प्रकाशन, आणन्द, 1950.
10. मेहेन्दळे, के.सी. डेट ऑफ शूद्रकाज मृच्छकटिकम् भाण्डारकर कोमेमोरेशन व्हॉल्यूम, पुना, 1917
11. मोडक, वि.वि. मृच्छकटिक, मुंबई, 1971
12. विश्वनाथ, साहित्यदर्पण, (संपा.) पी.व्ही. काणे, 1923
13. सालेटोर, बी.ए. किंग शूद्रक, ॲन हिस्टॉरिकल स्टडी जर्नल ऑफ युनिव्हर्सिटी ऑफ बॉम्बे व्हॉ.16, पार्ट 1, 1947, पार्ट 4, जानेवारी 1948
14. शूद्रक, मृच्छकटिक, निर्णयसागर एडिशन, विथ कॉमेन्टरी ऑफ पृथ्वीधर, 1926.

---------- ----------

संस्कृतवाङ्मये विशेषतः महाकाव्यपञ्चके युद्धशास्त्रम्

प्रा. डॉ. मञ्जूषा गोखले

नाट्यशास्त्रे भरतमुनिना उक्तम्–

नानाभावोपसंपन्नं नानावस्थान्तरात्मकम् ।
लोकवृत्तानुकरणं नाट्यमेतन्मया कृतम् ।। ना. शा.(1.112)

चराचरलोकेषु यद् यद् दृश्यते, तद् तद् अखिलं न केवलं नाट्ये, अपि तु सर्वेषु काव्यभेदेषु प्रतिबिम्बितमस्ति । युद्धं नाम लोकव्यवहारस्य महत्त्वपूर्णम् अङ्गम् । अपि च संस्कृतकाव्येषु बहुशः देवः वा राजा वा नायकरूपेण वर्णितः । सत्यपि शृङ्गाररसप्राबल्ये, तस्य देवस्य वा राज्ञः वा वीर्यशालित्वं नैव उपेक्षणीयम्, तदपि वीररसपरिपुष्टये वर्णितव्यम् इति मन्यन्ते कवयः । किरातार्जुनीय–शिशुपालवधादिकाव्यानि तथा दूतवाक्यपञ्चरात्रादीनि कानिचन नाट्यानि तु वीररसप्रधानानि एव । अतः संस्कृतवाङ्मयसंभारे सर्वत्र युद्धनिर्देशः तथा युद्धवर्णनानि बहुलतया प्राप्यन्ते ।

संस्कृतसाहित्यशास्त्रे यद्यपि प्रतिभा कवित्वबीजरूपेण बहुमता, तथापि 'श्रुतं च बहुनिर्मलम्' एतदपि काव्यकारणरूपेण स्वीकृतं दृश्यते । किं बहुना, प्रतिभा च व्युत्पत्तिः च एकस्यैव नाणकस्य द्वे अङ्गे इति शक्यं वक्तुम् । उक्तं भरतमुनिना–

न तद् शास्त्रं न तद् शिल्पं न सा विद्या न सा कला ।
नासौ योगो न तद् कर्म नाट्येऽस्मिन् यन्न दृश्यते ।। (1.116)

मम्मटाचार्येण कविव्युत्पत्त्यन्तर्भूतानां शास्त्राणां या नामावलिः निर्दिष्टा, तस्याः पठनेन 'अहो भारो महान् कवेः' इति भामहोक्तिः[1] यथार्था एव भाति । तस्यां शास्त्रनामावलौ युद्धशास्त्रमपि पठितमस्ति ।[2] युद्धशास्त्रस्य विशिष्टः ग्रन्थः तु

नोपलब्धः । किन्तु कौटिलीयार्थशास्त्रे, महाभारते शान्तिपर्वणि, मनुस्मृतौ राजधर्मप्रकरणे तथा अन्येषु नैकेषु ग्रन्थेषु निरूपितं यद् युद्धशास्त्रं, तस्योपयोजनं साहित्ये उपलभ्यते ।

राजनीतिविषये परराष्ट्रव्यवहारे शाड्गुण्यसंकल्पना मध्यवर्तिनी । तत्र विग्रहः अथवा युद्धम् इत्यस्ति एकः गुणः । वैरभावो नाम युद्धस्य मूलकारणम् । सापत्नं, वस्तुजं, स्त्रीजं, वाग्जातं, तथा अपराधजम् इति वैरपञ्चकं शास्त्रेषु लब्धम्[3] । तदधिष्ठितानि बहूनि युद्धकारणानि कल्प्यन्ते ।

विजिगीषोः राज्ञः कृते अर्थ एव प्रधानपुरुषार्थः, पृथिव्याः लाभपालनं नाम परमो राजधर्मः इति कौटिल्यः[4] । यदि विजिगीषुः राजमण्डले सार्वभौमत्वम् इच्छति, तदा विग्रहोपन्यासः भवत्येव । दूतवाक्ये इयमुक्तिः प्रसिद्धैव–

राज्यं नाम नृपात्मजैः सहृदयैर्जित्वा रिपून् भुज्यते
तल्लोके न तु याच्यते न तु पुनर्दानाय वा दीयते । (दूतवाक्यम्, 24)

व्यासमुनिनापि 'लभ्या धरित्री तव विक्रमेण' इति उपदिष्टः अर्जुनः किरातार्जुनीये[5] । रिपुणा परिमुषिते राज्ये तं पराजित्य स्वराज्यं पुनः प्राप्तव्यमिति क्षत्रियस्य राज्ञः प्रथमं कर्तव्यं मोक्षादपि श्रेष्ठम् इति भारविः–

वंशलक्ष्मीमनुद्धृत्य समुच्छेदेन विद्विषाम् ।
निर्वाणमपि मन्येऽहमन्तरायं जयश्रियः ।। (11.69)

एतदर्थमेव मगधराजसाहाय्येन विग्रहः कृतः उदयनेन स्वप्नवासवदत्ते । अन्येन राज्ञा अवमानितः राजा युद्धेनैव स्वक्रोधं शमयति । मत्स्यनृपः विराट् दुर्योधनस्य यज्ञमनुभवितुमनागतः इत्यवमानं मत्वा तस्य गोग्रहणार्थं युद्धं पुरस्कृतं भीष्मेण इति वर्णितं भासरचिते पञ्चरात्रे[6]

प्रसिद्धेयं कालिदासोक्तिः– 'क्षतात् किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः'[7] क्षत्रियेण 'परित्राणाय साधूनां विनाशाय च दुष्कृताम्' अवश्यमेव योद्धव्यमिति मध्यमव्यायोगे भीमसेनस्य उदाहरणे दृश्यते । कुमारसंभवेऽपि

त्रैलोक्यपीडकस्य तारकासुरस्य नाशायैव कार्तिकेयः विग्रहे अधितिष्ठति। शिशुपालवधेऽपि शतापराधत्वात् दण्डनीयः एव शिशुपालः इत्यतः युद्धप्रसङ्गः प्राप्तः।

न कोऽपि क्षत्रियः अधिक्षेपं सहते। अतः क्षत्रियत्वस्य परामर्शे महान् खलु संघर्षः जायते।

उत्तररामचरिते चन्द्रकेतोः सैनिकानाम् अखिलक्षत्राक्षेपकारीणि वचांसि श्रुत्वा संदीप्तजः लवः युद्धाभिमुखः जातः [8] श्रेष्ठत्वापबाधे क्रोधाग्निना ज्वलन्निव परशुरामः युद्धाय रामसम्मुखं स्थितः रघुवंशे तथा महावीरचरिते। परिभवे पराक्रममेव भूषणम् इत्यस्ति माघोक्तिः [9]। युद्धे शत्रुवधेनैव क्षत्रियस्य कीर्तिः द्यामधिरोहति [10] इत्येषा अवधारणा युद्धकारणीभूता। धर्मकार्येषु विघ्नोऽपि युद्धहेतुः भवति। यतः विघ्नेभ्यः धर्मकार्यरक्षणं क्षत्रियस्य स्वधर्म एव। विश्वामित्रमख–विघ्ननाशायैव रामताटकायुद्धं प्रवृत्तम्। अश्वमेधयज्ञाश्वापहरणात् प्राप्तेन सार्वभौमत्वस्य अभिग्रहेण विग्रहः कल्पते। रघुदेवेन्द्रयुद्धं तथा मालविकाग्निमित्रे पुष्पमित्रयवनयुद्धम् अनेनैव कारणेन संजातम्।

कुलकलहः तथा कुलस्त्रीपरामर्शः युद्धे परिणमति इति प्रसिद्धमेव वेणीसंहारे। तथा भासस्य दूतवाक्येऽपि प्रारम्भे प्रदर्शितः द्रौपदीकेशग्रहणवृत्तान्तः युद्धस्य कारणं प्रदर्शयति। क्वचित् मित्ररक्षणार्थमपि युद्धप्रसङ्गः। मालविकाग्निमित्रे दायादबद्धस्य माधवसेनस्य विमोचनाय अग्निमित्रः विदर्भनृपेण अयुध्यत्। यदि अन्यैः कारणैः सह प्रमदामिषं नाम महत् विग्रहकारणं मिश्रितं, तर्हि वह्नौ तैलदानमिव भवति। रघुवंशे षष्ठे सर्गे यद् युद्धं संजातं, तत्र द्वौ खलु हेतू। रघुणा पराजिताः नैके नृपाः पूर्वमेव प्रमन्यवः आसन् तदुपरि अजस्य इन्दुमतीलाभात् 'गण्डस्योपरि पीटिका' इति न्यायेन अतीव संक्रुद्धाः ते अजेन अयुध्यन्[11]। माघेन वर्णितं यद् शिशुपालः दण्डनीयः नैकैः कारणैः। शुभेतराचाररतेन तेन बलावलेपात् जगतः शान्तये'। तथा हि रुक्मिणीं हरता हरेण विप्रकृतः सः यादवदारापहरणमकरोत्। संयुक्तिकमेव माघेन उक्तम्–

'बद्धमूलस्य मूलं हि महद्वैरतराः स्त्रियः' [12]। महावीरचरितानुसारं मूलतः रावणः परोत्कर्षासहिष्णुः, तदुपरि सुन्दोपसुन्दताटकादिराक्षसवधेन रामेण वैरमाहूतम्, ततोऽपि रावणेन दूतमुखेन सीताविषये कृतां याचनां प्रत्याख्याय विश्वामित्रादिभिः त्वरया सीतारामयोः विवाहः संपादितः। एतेषां सर्वेषां परिभवाणां परिणतिः सीताहरणे तथा च युद्धेऽभवत्। 'अप्रतिसमाधेयं स्त्रीवैरम्' इति साधूक्तं भवभूतिना [13] संक्षेपेण युद्धकारणं निगदितं भासस्य पञ्चरात्रे–

उद्योगः प्रस्तुतः कस्माच्छ्रीर्न सन्तोषमिच्छति।
पीडयिष्यति सोत्सेकान्पीडितान्मोक्षयिष्यति।। (2.8)

इत्थं नैकैः कारणैः द्वाभ्यां पक्षाभ्यां विसंवादः संजायते, तेन युद्धप्रसङ्गः आक्षिप्यते,किन्तु प्रत्येकं विसंवादस्य परिणतिः युद्धे भवितुं नैव अर्हति।'.षड्गुणाः शक्तयस्तिस्रः सिद्धयश्चोदयास्त्रयः'[14] एतान् सर्वान् सम्यक् विचार्य, फलं समीक्ष्य, शक्त्यपेक्षेण राज्ञा सन्ध्यादिषाड्गुण्यं समुपयोक्तव्यम् [15]। यदि सन्धिविग्रहयोः तुल्यमेव फलं, तर्हि सन्धिः प्रशस्तः इत्यस्ति शास्त्रम्। माघानुसारं तन्त्रावापौ नाम स्वपरराष्ट्रं सम्यग् विचार्य, योगैः नाम सामाद्युपायैः शत्रवः सुनिग्राह्याः[16] क्षमासमर्थस्य भूषणमिति सत्यमेव, किन्तु 'पौनः पुन्येन विराध्यन्तं शत्रुं कः क्षमेत?' इति माघः [17]। वारं वारम् उत्तिष्ठमाने सामर्षे अरौ वैरं विधाय ये राजानः उदासते, ते खलु विनश्यन्ति [18]। अर्थात् देशकालावस्थापेक्षि खलु शौर्यं नयानुगामिनाम्। विशेषतः अनन्तराः नृपाः तेषां स्वाभाविकशत्रुत्वात् न क्षन्तव्याः, कोशदण्डबलेन वशमानेतव्याः इति रघुवंशे अजस्य उदाहरणेनापि स्पष्टम्।[19]

कदाचित् विना युद्धं केवलं बुद्धिसामर्थ्येनापि रिपवः वशीभूताः कर्तव्याः। 'सेनाशतेभ्योऽधिका बुद्धिः' इति वदति विशाखदत्तः [20] 'शास्त्रेष्वकुण्ठिता बुद्धिर्मौर्वी धनुषि चातता'इति द्वेऽपि साधने प्रयोक्तव्ये [21]। शास्त्रेषु पठितानि सामदामभेदादिसाधनानि प्रथमतः समीक्षितव्यानि। यदि एतद् साधनत्रयम् अनुपयुक्तं सिद्धम्, तदनन्तरमेव ' दण्डोपायः चिन्त्यते माल्यवता महावीरचरिते। सामप्रयोगार्थमेव युद्धात् पूर्वं दूतप्रणिधानं क्रियते इति दृष्टं दूतवाक्ये। किन्तु

क्वचित् सकोपस्य शत्रोः दीपकाः भवन्ति सामवादाः [22] इत्यपि सत्यमिति तत्रैव दृश्यते ।

यदि युद्धमनिवार्यं, तथापि न तस्य व्याप्तिः वर्धनीया । अन्यथा सर्वत्र विनाशस्यैव साम्राज्यं भवेत् इति विचारेणैव उद्धवः शिशुपालेन सह युद्धं न समर्थयति । दूतघटोत्कचेऽपि दृश्यते यद्, युद्धस्य प्रसरः बालानपि नाशयेत् । अतः कुलक्षयस्य भयात् कृष्णः युद्धसमापनाय घटोत्कचं दूतरूपेण धृतराष्ट्रसकाशं विसृजति ।

युद्धं कदा कर्तव्यम्? स्वशक्त्युपचये तथा परस्य व्यसने एव । यदा शत्रुबलं परिक्षीणं भवति तदैव युद्धं कर्तव्यम् । जरासन्धवधेन शक्तिक्षीणः शिशुपालः, अत एव आक्रमितव्यः इति बलरामस्य मतं शिशुपालवधे [23] । किन्तु रिपुः असहायो वा इति अवश्यं विचारणीयम् । यतः बृहत्सहायः क्षुद्रोऽपि कार्यान्तं गच्छति । वीर्यास्त्रबलैः यदा स्वपक्षः ज्यायान् तदैव विजयसिद्धिः । 'प्रकर्षतन्त्रा हि रणे जयश्रीः' इति भारविः [24] । विग्रहस्य कृते कीदृशी स्थितिः अनुकूला इति उक्तं विशाखदत्तेन – उत्कृष्टं सैन्यबलं, अभियोक्ता युयुत्सुः राजा, राजानुरक्तं पुरं, रिपोः अमात्याः अधिकारविमुखा', नवः च शत्रुराज इति [25] । कीदृशी सेना जयति कीदृशी च पराभवं प्राप्नोति इति कथितं मुद्राराक्षसे–

साध्ये निश्चितमन्वयेन घटितं बिभ्रत्स्वपक्षे स्थितिं
व्यावृत्तं च विपक्षतो भवति यत् तत्साधनं सिद्धये ।

यत्साध्यं स्वयमेव तुल्यमुभयोः पक्षे विरुद्धं च यत्
तस्याङ्गीकरणेन वादिन इव स्यात्स्वामिनो निग्रहः ।।(5.10)

केवलं बहुसैन्यत्वं युद्धाय न अलम् । नैककार्यं, परिमितवीरपुरुषम्, अननुरक्तं बलं नैव जयति इति भासः[26] । विज्ञातापरागहेतुः तथा राजानुरक्तमेव बलं जयति इति दृढं समर्थितं भासेन तथा विशाखदत्तेनापि ।

युद्धपूर्वं सिद्धता आवश्यकैव । संक्षेपेण एतद्विषये कथितं स्वप्नवासवदत्ते–

भिन्नास्ते रिपवो भवद्गुणरताः पौराः समाश्वासिताः
पार्ष्णीं यापि भवत्प्रयाणसमये तस्या विधानं कृतम् ।
यद्यत् साध्यमरिप्रमाथजननं तत्तन्मयानुष्ठितम् ।(5.12)

युद्धपूर्वमनुष्ठेयौ परकृत्योपजापौ इति द्वौ उपायौ अर्थशास्त्रे वर्णितौ, तयोरुपयोजनं मुद्राराक्षसे दृश्यते[27] । अतिनिपुणानां चराणां योजनेन शत्रुपक्षस्य गतिविधयः ज्ञातव्याः । तथा तत्र ये असंतुष्टाः तान् भेदेन दाम्ना च वशीकर्तव्यम् । एतद् द्वयमपि वेणीसंहारे युधिष्ठिरेणानुष्ठितं दृश्यते । अपस्पशा राजनीतिः नैव भाति । अतः स्पशद्वारेण शत्रोः सामवायिकाः भेद्याः [28] ।

गुणातिशययुक्तः विजिगीषुः विग्रहार्थं यायात् इति कौटिल्यः । दिग्विजययात्रायै प्रस्थितस्य रघोः 'गुप्तमूलप्रत्यन्तः' तथा' शुद्धपार्ष्णिः' एतौ द्वौ विशेषौ कथितौ [29] ताभ्यां युद्धपूर्वसिद्धता एव प्रकटीकृता । माघानुसारं युद्धात् प्राक् रिपोः अष्टादशतीर्थानि सम्यगवेक्षितव्यानि, भेदोपायेन तानि दुर्बलीकर्तव्यानि[30] । तथैव स्वस्य पञ्चदशतीर्थानि रक्षितव्यानि । समाप्तायां वर्षायां शरत्काले यदि ब्रह्मबलक्षत्रबलौ समेतः तर्हि विजयश्रीः निश्चिता[31] । मनुराह–

नाब्रह्म क्षत्रमृध्नोति नाक्षत्रं ब्रह्म वर्धते ।
ब्रह्म क्षत्रं च संपृक्तमिह चामुत्र वर्धते ।। (9.322)

अथर्वविदः वसिष्ठस्य साहाय्येनैव अजः युद्धेषु परैः अजेयः इति कालिदासः [32] । कुमार–तारकासुर–युद्धेऽपि ब्रह्मनक्षत्रसहयोगः विजयाय कल्पितः [33] । किराते पाण्डवानां विजयार्थं भगवता व्यासेन साहाय्यं कृतम् ।

युद्धार्थं बलं मौलादिषड्विधं भवति इति यदुक्तं शास्त्रे, तस्य निर्देशः अस्ति रघुवंशे [34] । नौसेनाऽपि निर्दिष्टा तत्र [35] । अन्यत्र बहुशः चतुरङ्गबलमेव निर्दिष्टं प्राप्यते पत्तिदलं, अश्वदलं, रथदलं तथा गजदलम् इति [36] । चतुर्षु अङ्गेषु किंचन अङ्गनैपुण्यात् तथा उपलब्धत्वात् विशेषेण उपयुज्यते लोकविशेषैः । यथा पाश्चात्याः अश्वसाधनाः, कलिङ्गाः गजसाधनाः वङ्गाः नौसाधनाः तथा पर्वतीयाः

अश्मसाधनाः इति वर्णितं रघुवंशे [37] । सामान्यतया पत्ती पत्तिना सह, अश्वसादी अश्वसादिना सह, रथी रथिना सह तथा गजस्थः गजस्थेन सह युध्यति [38]

युद्धस्य द्वौ भेदौ– प्रकाशयुद्धं तथा कूटयुद्धम् । प्रकाशयुद्धम् धर्मप्रशस्तम् । रघुदिग्विजये, कुमारसंभवे, तथा शिशुपालवधे सर्वत्र तदेव वर्णितम्[39] । किन्तु अभ्यधिके शत्रौ प्रकाशदण्डः न प्रशस्यते । अतः माल्यवान् कपटयुद्धम् आरभते महावीरचरिते [39अ] । माघः तु मन्यते– व्यसनेऽपि नीतियुद्धं कुर्वन्तु राजानः [40] ।

युद्धे सेनायाः बुद्धिपुरस्कृता व्यूहरचना अवश्यंभाविनी । कुतः इति चेत् उच्यते–'प्रज्ञाबलबृहन्मूलः उत्साहपादपः प्रभुशक्तिं फलति' इत्युक्तं माघेन[41] । व्युहैः बलम् अजेयं भवति । प्रथमं तावत् साधारणसैनिकाः परस्परैः युध्यन्ति,अनन्तरं मान्याः वीराः, अन्ततः नायकाः वा प्रमुखाः नृपाः वा परस्परं युध्यन्ति इत्येषा परिपाटी दृश्यते । यथा युद्धे तथा प्रयाणेऽपि व्यूहरचना कर्तव्या । परिकल्पितभागैः सैन्यैः प्रयातव्यम् । सेनाप्रमुखैः स्वसेनया सह पुरः मध्ये तथा पश्चात् स्थातव्यं राजानं परिवृत्य तस्य रक्षणं कर्तव्यम् । रिपुमर्मस्थानं विज्ञाय तत्रैव प्रहारे कृते निश्चितं यशः । यथाह विशाखदत्तः–बहुषु अभियोगकारणेषु सत्सु व्यसनमभियुञ्जानस्य शत्रुम् अभियोक्तुः ऐकान्तिकी कार्यसिद्धिर्भवति[42] । परविषये व्यूहविभेदनं, पदवीनिरोधनं तथा विध्वंसनम् एते विजयोपायाः किराते पठिताः [43]

विविधशस्त्रास्त्राणां नैके निर्देशाः काव्येषु पठ्यन्ते । रघुवंशे रामरावणयुद्धे राक्षसाः परिघैः, मुग्दरैः, शस्त्रैः तथा गजैः अनुक्रमेण वृक्ष–शिला–नख–शैलधारिभिः वानरैः अयुध्यन् [44] । शरचापनिर्देशाः विपुलाः । शिशुपालवधार्थं यद् युद्धं तद् प्रामुख्येन चापबाणैरेवाभवत् । चापभृतः शरप्रयोगे कुलोपदेशान् उदीरयन्ति इति ईदृशी रूढिः रघुवंशे प्राप्यते [45] । धनुर्विद्यार्थं शिक्षागुणप्रयोगानाम् अनिवार्यता किराते वर्णिता । धनुर्धारिणा अप्रमत्तेन चक्रबन्धादिगतिभिः रणे विचरितव्यम् इति भारविः[46] । आयुधं द्विविधम् इति माघः–मुक्तम् अथवा अस्त्रं नाम बाणादि । अमुक्तम् अथवा शस्त्रं नाम खड्ग–कुन्त–गदादि । तत्र अस्त्रं चतुर्विधमिति माघः । तेषां नामानि अस्त्रम्, अपास्त्रम्,व्यास्त्रं, महास्त्रम् इति मल्लिनाथटीकायाम्[47] ।

लौहकवचं, तूलकवचं, तथा निषङ्गोऽपि निर्दिष्टोऽस्ति । अस्त्रप्रयोगे स्वापनास्त्रं, नागास्त्रं,गरुडास्त्रं, अग्न्यस्त्रं, संमोहनास्त्रं, जृम्भकास्त्रम् आदीनि अस्त्राणि–प्रत्यस्त्राणि वर्णितानि । शस्त्रेषु असि–चर्म–तोमर–शक्ति–प्रास–परशु–भिण्डिपाल–शूल–मुसल–मुद्गर–वराहकर्ण–कर्पण–शङ्कु–गदा–नाराच –शस्त्री--शतघ्नी–आदीनि नामानि सन्ति [48] सौष्ठवलाघवौ एतौ गुणौ योद्धृणां कृते अतीव आवश्यकौ । कालिदासेनोक्तं–रथयुद्धं कुर्वन्तः योद्धारः रथभग्ने सति रथादवतीर्य गदायुद्धं कुर्वन्ति । यदि गदाऽपि भग्ना, तदा बाहुयुद्धमपि कुर्वन्ति [49] । बाहुयुद्धं नाम वीर्यस्य निकषः इति अवधार्यते । यथा पञ्चरात्रे भीमः वदति–

सहजौ मे प्रहरणं भुजौ पीनांसकोमलौ ।
तावाश्रित्य प्रयुध्येयं दुर्बलैर्गृह्यते धनुः ।।(2.55)

यदा वीराः श्रमार्ताः वा परिक्षीणोत्साहाः वा, तदा बन्दिजनैः वैतालिकैः च वीररसपूर्णैः गायनैः ते चोदयितव्याः इत्यपि रूढिः शिशुपालवधे तथा किरातार्जुनीये दृष्टा [50] ।

युद्धे सारथ्यकर्मापि महत्त्वपूर्णम् । यदि रथस्वामी मूर्च्छितः तदा रथम् अन्यत्र नीत्वा तस्य संरक्षणं कर्तव्यम् इति सारथिधर्मः रघुवंशे व्याख्यातः [51] । वेणीसंहारेऽपि एतद् उदाहृतम् । योधधर्मः अथवा क्षात्रधर्मः इति विषयः यथा शास्त्रेषु तथैव काव्येषु अपि सर्वत्र सविस्तरं निरूपितः दृश्यते । उरुभङ्गे युद्धस्य कृते यज्ञस्य तथा आश्रमपदस्य च रूपकम् आयोजितम् [52] । कुत इति चेत् उच्यते–स्वर्गफलात् । क्षत्रियः यदि अपराङ्मुखः युधि हतः, तदा अवश्यमेव स्वर्गं प्राप्नोति ।

हतोऽपि लभते स्वर्गं जित्वा तु लभते यशः ।
उभे बहुमते लोके नास्ति निष्फलता रणे ।। (कर्णभारम्,12)

रणपराङ्मुखाः सैनिकाः' अवधारितक्षात्रधर्माः, समुज्झितसत्पुरुषोचित–लज्जावगुण्ठनाः, विस्मृतस्वामिसत्कारलघुचेताः' इति अपशब्दैः अवमानिताः[53]

छलेन प्राप्तः विजयः नैव सत्यः। भीमेन यदा 'त्यक्त्वा धर्मघृणां विहाय समयम् उर्वोर्विमुक्ता गदा', तदा दुर्योधनः वदति – 'यद्येवं समवैषि मां छलजितं भो राम नाहं जितः।'[54]

न कोऽपि वीरः शस्त्रमूर्च्छितं प्रतिद्वन्द्विनं भूयः प्रहरति। तस्य समाश्वसनं यावत् न भवति, तावत् प्रतिपालयति [55]। वीरः वीरेणैव विगृह्णाति, न सामान्यसैनिकैः। कः तत्र पुरुषार्थः[56]? रघुवंशे रामः यौ मखद्विषामधिपती सुबाहुमारीचौ तौ एव शरव्यमकरोत् नेतरान्। नैके वीराः एकमात्रं प्रतिद्वन्दिनं नैव आक्रमन्तु। द्वयोः नायकयोः युध्यमानयोः सैनिकैः केवलं प्रेक्षकैः भवितव्यम्। न रथिनः पादचारम् अभियुञ्जन्ति। एषा एव युद्धनीतिः उत्तररामचरिते विस्तरेण वर्णिता –

संख्यातितैर्द्विरदतुरगस्यन्दनस्थैः पदाता–
वत्रैकस्मिन्कवचनिचितैर्मध्यचर्मोरीये वै।

कालज्येष्ठैरभिनववयः काम्यकाये भवद्भि–
र्योऽयं बद्धो युधि समभरस्तेन धिग्वो धिगस्मान्।। (5.12)

यो वा को वा शत्रुः भवेत्, आप्तो वा प्रियो वा, आत्मभावं परित्यज्य विग्रहः कार्यः इत्येषा नीतिः। उक्तमेतद् वेणीसंहारे –अकरुणा खलु क्षात्रपदवी। क्षात्रोचितां विपत्तिमुपगते वीरे नैव शोकः स्पृहणीयः। तस्य आप्तजनैरपि तदनुरूपेणैव शौर्येण शोकसागरः तरणीयः।

वीराः स्वेतरीयस्य आदानं च कुर्वन्ति इति परिपाटी वर्तते। अयं निरुच्छनविधिः परस्परबन्धुभाववर्धनार्थं क्रियते इति कुमारसंभवे प्राप्यते [57]। वीरैः न कदापि स्ववीर्यगर्वः वहनीयः। यावत् क्षत्रं तावत् समरविजयिनो जिता हताश्च वीराः। तत् किं विकत्थनाभिः [58]? त्रयोऽभियोक्तारो धर्मलोभासुरविजयिनः[59] कृते ये अनम्राः रिपवः तेषाम् उच्छेदनम् अपजयः, पीडनं तथा कर्षणम्[60]। तत्र धर्मविजयिनः कृते ये अनम्राः रिपवः ते उच्छेदनीयाः। ये शरणागताः तेषां यशः एव

हरणीयं,नैव प्राणाः वा कर्षणं वा तेषाम् अमतम्। 'गृहीतप्रतिमुक्तः' स खलु धर्मविजयी नृपः [61]।

एषः सर्वः साङ्ग्रमिको न्यायः एष एव सनातनो धर्मः मतः यः नीतिविद्भिः उदाहृतः कविभिश्च वर्णितः।

युद्धानन्तरं कानिचन कर्तव्यानि वर्णितानि। यशस्विनः सेनापतयः सभाजयितव्याः [62] दृष्टपरिस्पन्दानां योधपुरुषाणां कर्माणि पुस्तके आलेख्यानि तथा तेषां पूजा करणीया। 'अकालान्तरिता पूजा नाशयत्येव वेदनाम्' [63]। न केवलम् आत्मीयाः,अपि तु परगुणाः अपि अभिनन्दनीयाः। मित्रं हिरण्यं भूमिः एतद् त्रिविधं फलं युद्धस्य [64]। तदेवं प्राप्तं साहित्येषु वर्णितेषु युद्धेषु नायकैः। किन्तु सर्वत्र अयमेव विचारः प्रकटितः कविभिः यद्, युद्धं नैव साध्यं भवितुमर्हति। साधनमात्रं तु तद्। तदपि न सर्वत्र एकान्तेन प्रयोज्यम्। न कोऽपि नायकः क्रोधावेशवशात् प्रत्यपकारबुद्ध्या वा सहसा युद्धार्थं सिद्धः। क्षान्तिपूर्वमेव क्षात्रं फलतीति सम्यग् जानन्ति ते [64अ]। प्रत्येकं प्रथमतः शक्तेः युक्तिर्बलीयसी इति विचार्य सामाद्युपायाः एव अवलम्बिताः। तेषां निष्फलत्वादेव धर्मयुद्धमाचरितं, तदपि 'आर्तत्राणाय वः शस्त्रं न प्रहर्तुमनागसि' इति न्यायेनैव।

अनित्यो विजयो यस्माद्दृश्यते युद्ध्यमानयोः।
पराजयश्च सङ्ग्रामे तस्माद्युद्धं विवर्जयेत्।।

त्रयाणामप्युपायानां पूर्वोक्तानामसंभवे।
तथा युद्ध्येत संपन्नो विजयेत रिपून्यथा।।[65]

इति यद् मनुना उक्तं, तदेव पुनरुद्घोषितं कविभिः। अस्माभिः एतदेव कर्तव्यम्– 'यानि तेषां सुवचनानि तान्येव सेवितन्यानि'। इति शम्।

संदर्भाः–

1. काव्यालङ्कारः 5.4
2. काव्यप्रकाशः, 1.3, तत्र वृत्तिः

3. भवभूतीची रामकथा, वर्णेकर श्री. भा. पुणे,1996, पृ.103
4. कौटिलीयार्थशास्त्रम्, 1.3.6;1 1–1
5. किरातार्जुनीयम्, 3.17
6. पञ्चरात्रम्, टी. गणपतिशास्त्री, त्रिवेन्द्रम्, 1917, पृ.45
7. रघुवंशम, 2.53
8. उत्तरामचरितम्, संपादनम्– मराठे–नगरकर, पुणे, पृ. 118; तत्रैव 4.28–
 यदि ते सन्ति सन्त्येव केयमद्य बिभीषिका।
 किमुक्तैरेभिरधुना तां पताकां हरामि वा।।
9. शिशुपालवधम्, 2.44
10. तत्रैव 2.52
11. रघुवंशम्, 7.34
12. शिशुपालवधम्, 1.73, 2.3,2.38, 2.40
13. भवभूतीची रामकथा, वर्णेकर श्री.भा. पुणे, 1996, पृ. 413
14. शिशुपालवधम् 2.26
15. तत्रैव 2.94
16. तत्रैव 2.88
17. तत्रैव 2.43
18. तत्रैव 2.42
19. रघुवंशम्, 8.18
20. मुद्राराक्षसम्, 1.25
21. रघुवंशम्1.19
22. शिशुपालवधम्, 2.55
23. तत्रैव 2.57, 84
 हते हिडिम्बरिपुणा राज्ञि द्वैमातुरे युधि।
 चिरस्य मित्रव्यसनी संदमो दमघोषजः।। 2.60
24. किरातार्जुनीयम्, 3.17
25. मुद्राराक्षसम् 4.15
26. प्रतिज्ञायौगन्धरायणम् 1.4
27. मुद्राराक्षसम् संपादनम्– भट गो. के.,के., पुणे, 1974, पृ.62
28. शिशुपालवधम्, 2.112,113
29. रघुवंशम्, 4.26

30. शिशुपालवधम्, 2.111
31. रघुवंशम्, 4.16,24,25
32. तत्रैव 8.04
33. कुमारसंभवम्, 13.21
34. रघुवंशम्, 4.26
35. तत्रैव 4.36
36. शिशुपालवधम्, 19.25; पञ्चरात्रम्, 2.7
 स्वप्नवासवदत्तम्, संपादनम्– काळे मो.रा., दिल्ली, 1991–
 'हस्त्यश्वरथपदातीनि विजयाङ्गानि'।
37. रघुवंशम्, 4.36, 40, 62,77
38. तत्रैव 7.37
39. वेणीसंहारम्, संपादनम्– भट–गायधनी, पुणे, 1957, पृ.144–
 धृतराष्ट्रः– वत्स, यद्यपि भवान् समराय कृतनिश्चयः तथापि रहः प्रतीघातोपायः चिन्त्यताम्।
 तत्रैव – अविकृतिनिपुणं ते चेष्टितम्। छलबहुलमरीणां सङ्गरम्।
39अ. महावीरचरितम्, 4.3,4
40. शिशुपालवधम्, 19.60
41. तत्रैव 2.89
42. मुद्राराक्षसम्, संपादनम्–भट गो.के., पुणे, 1974, पृ.182
43. किरातार्जुनीयम्, 17.27–
 विभेदमन्तः पदवीनिरोधं विध्वंसनं चाविदितप्रयोगः।
 नेताऽरिलोकस्य करोति यद्यत्तच्चकारास्यशरेषु शम्भुः।।
44. रघुवंशम्,12.72–73
45. तत्रैव 7.38
46. किरातार्जुनीयम्, 15.6;17,36,38
47. शिशुपालवधम् 18.11
48. उरूभङ्गम्, टी.के. रामचन्द्र अय्यर, त्रिपुणिथुरा (केरल), 1995, पृ.6–8
49. रघुवंशम्, 7.52
50. कुमारसंभवम्, 15.52;16.3
 शिशुपालवधम्, 18.16
51. रघुवंशम्, 7.44

52. उरूभङ्गम्,2,4,6–
वैरस्यायतनं बलस्य निकषं मानप्रतिष्ठागृहं युद्धेष्वाप्सरसां स्वयंवरसभां शौर्यप्रतिष्ठां नृणाम् ।
राज्ञां पश्चिमकालवीरशयनं प्राणाग्निहोमक्रतुं संप्राप्ता रणसंज्ञमाश्रमपदं राज्ञां नभ; संक्रमम् ।।
वेणीसंहारम्, 1.25
53. वेणीसंहारम्, संपादनम्–भट–गायधनी, पुणे, 1957, पृ.68
54. उरूभङ्गम्,24,34
55. रघुवंशम, 7.47–
पूर्वं प्रहर्ता न जहान भूयः प्रतिप्रहाराक्षममश्वसादी।
तुरङ्गमस्कन्धनिषण्णदेहं प्रत्याश्वसन्त रिपुमाचकाङ्क्ष ।।
56. उत्तरामचरितम्, 5.16
57. कुमारसंभवम्, 13.18,21–
तस्योत्तरीयेण निजाम्बरेण निरूञ्छनचारू चकार शक्रः । 13.18
58. वेणीसंहारम्, संपादनम्– भट–गायधनी, पुणे, 1957,पृ.156
59. कौटिलीयार्थशास्त्रम्, 12.1.10
60. भवभूतीची रामकथा, वर्णेकर श्री.भा., पुणे, 1996, पृ.105
61. रघुवंशम्, 4.35,37,43
62. वेणीसंहारम्, संपादनम्–भट–गायधनी, पुणे, 1957,पृ.28
63. पञ्चरात्रम्, 2.55
64. मनुस्मृतिः, 7.206
64 अ. शिशुपालवधम्, 2.85– मृदुव्यवहितं तेजा भोक्तुमर्थान् प्रकल्पते।
65. तत्रैव 7.199–200

---------- ☙♦❧ ----------

कालिदासस्य नीतिचिन्तनम्

डॉ. लीना रस्तोगी

---------- ☙♦❧ ----------

कविः ''क्रान्तदर्शी'' इत्युच्यते, यतो हि दिक्कालातीतं तस्य चिन्तनम् । सार्वकालिकं सर्वस्पर्शि च तत् । न केवलं तत् सहृदयहृदयान्याह्लादयति, कान्तासंमिततया प्रबोधनमपि करोति । अत्र तु साक्षात् कविकुलगुरोः कालिदासस्य चर्चा, यस्य विषये श्रीकृष्णकविर्वदति,

''प्रियाङ्कपालीव विमर्दहृद्या
न कालिदासादपरस्य वाणी !''[1]

कामं 'विमर्दहृद्ये'ति विशेषणं तेन रसास्वादनदृष्ट्योपयोजितं, किन्तु कालिदासस्य चिन्तनसारग्रहणार्थमपि तत् सुष्ठु घटते ।अतः कवेः कालिदासस्येव शब्दान् मनसि निधाय, तस्य रचनासु पदे पदे प्रतिबिम्बितस्य जीवनदर्शनस्य विषये किञ्चित्प्रस्तोतुकामास्मि।

सर्वासु तस्य रचनासु सुपरिष्कृतं जीवनदर्शनं, सुनीतितत्त्वं च पदे पदे अभिव्यज्येते। समासेन वक्तव्यं चेत् प्रतिपादयितुं शक्यते यत् त्यागस्तपस्या–तपोवनम् इति तकारादिशब्दकुटुम्बमेव कालिदासस्याभीष्टतमम्। सर्वाण्यप्यन्यानि तत्त्वान्येतस्यामेव त्रितय्यामनुस्यूतानि।

त्यागः

रघुवंशीयानां नृपाणां कृते प्रयुक्तैर्विशेषणैः कालिदासेन स्वाभिमतानि जीवनमूल्यानि शब्दाङ्कितानि। त्याग इति तेषु प्रधानतमो गुणविशेषः। तस्यैव 'त्याग' वर्णस्य विविधा मनोहारिण्यो दीप्तिच्छटा यज्ञदानादिरूपैस्तत्र विलसन्ति। ते नृपाः ''त्यागाय[2] संभृतार्थाः ।तेषु दिलीपः ''प्रजानामेव भूत्यर्थं''[3] करं गृह्णाति।

यावत्स्वीकरोति ततः सहस्रगुणम् उत्सृजति। कालिदासवर्णितो रघुः विश्वजिध्वरे "अकिञ्चनत्वं मरवजं व्यनक्ति"[4] तत्रापि कौत्साय तदभीप्सितं गुरुदक्षिणाराशिं प्रदातुं स तत्परः। तदर्थ धनाधिपतिं कुबेरमेवाभिसर्तुं स उद्युक्तो, न प्रजाजनान् निष्पीडयितुमिति यत्कालिदासेन चित्रितं तल्लक्षणीयं खलु।

आधुनिका अपि चिन्तकाः सुनीतिदर्शनम् (Ethics) इत्येकमात्रमुपायं प्रतिपादयन्ति विश्वशान्त्यर्थम्। तैस्तस्य चतुर्धा विभाजनं कृतम्। सत्यसम्बद्धं (Meta-Ethics), व्यावहारिकं (Normative), परिस्थित्यनुसारं (Applied) जनमानसविश्लेषणात्मकम् (Descriptive) इति। अत्र सविस्मयं साभिमानं च प्रतिपादयितुं शक्यते यत्परिहार्यापीदृशं विभाजनं, कालिदासेन कान्तासंमिततया तदेव संसूचितम्। त्यागाय संभृतार्थस्य दिलीपस्य वर्णनेन व्यावहारिकनीतेः (Normative) चित्ताकर्षकं चित्रं तेन प्रस्तुतम्। तथैव, परिस्थित्यनुसारं कुत्र, कथं वा नीतिरुपयोजनीया (Applied Ethics) इति रघुकौत्सप्रसङ्गे चेतोहारितया वर्णितं कविमुकुटमणिना कालिदासेन।

अजस्य विषये स वर्णयति,

'वसु तस्य विभोर्न केवलं गुणवत्तापि परप्रयोजना।'[5] – अत्राजस्यत्यागवृत्तिस्तु अभिव्यज्यत इति निर्विवादं, परन्तु तत्रापि एव दृग्गोचरीभवति। यतो हि – अत्र ध्यातव्यं यत्कालिदासोऽवाप्तराजाश्रय आसीत्। धर्मदण्ड्यमपि राजप्रभुत्वं तेषु दिनेषु अनिर्बन्धमिव। सा प्रभुता प्रजानन्दकरी भवत्विति भावनया, राजां पुरत आदर्शोपस्थापनार्थमेवैषा कल्पनासृष्टिस्तेनाकारि इति मे मतिः। यतो हि प्रथमे वयसि प्रणीते नाटकद्वये नैष आदर्शोपस्थापनप्रयासो दृश्यते, यस्तेन परिणतप्रज्ञादशायां प्रणीतासु कृतिषु सोद्देशं कल्पितः।

निर्लोभिता

निर्लोभिता इत्यपरोऽपि सद्गुणो यस्त्यागेऽनुस्यूतः। तत्रापि रघुकौत्सप्रसङ्गः प्रमाणम्। रिक्तकोषस्य रघोः कोषागारे धनपतिना सुवर्णवृष्टिरकारि। सुमहान् सुवर्णराशिस्तत्राभूत्। किन्तु कौत्सयाचनैव तत्र

निमित्तमिति रघोश्चिन्तनम्। स्वीयकोशगतेऽपि धने न लोभलेशोऽपि तस्य मनस्युत्पद्यत इति वर्णयति कालिदासः। तत्र युवा कौत्सोऽपि निर्लोभितागुणे न मनागपि न्यूनतरः। केवलं गुरुदक्षिणोचितमेव धनं स स्वीकर्तुमुद्युक्तो न मुद्रामात्रमपि अधिकतरम्। "द्वावप्यभूतामभिनन्द्यसत्त्वौ।"[6] यत्किलार्वाचीना नीतिविदः जनमानसविश्लेषणात्मकं नीतिशास्त्रम् (Descriptive ethics) इति सम्बोधयन्ति तस्यैव सरसरमणीयं चित्रणमत्र प्राप्यते।

राम–भरत–मेलन–प्रसङ्गमपि कालिदासस्तथैव वर्णयति। एकत्र न्याय्यमपि राजविभवं केवलं पितृवचनपूर्त्यर्थं तृणाय मन्यमानस्त्यागमूर्तिः श्रीरामोऽपरत्र[7] चाङ्कगतामपि राज्यलक्ष्मीमस्प्रष्टुकामो भरतः[8]। उभावपि निर्लोभितायाः प्रतीकमूर्ती। – "श्रीर्विसर्गेण शोभते" इति व्याकरणनियमः। कालिदासस्य प्रातिभजीवने खलु स जीवनसरणेः आदर्शः।

सैव जीवनदृष्टिराधुनिके नीतिशास्त्रे सत्याधिष्ठितनीतिः (Meta-Ethics) इति प्रशस्यते।

समष्टिहितार्थं व्यष्टिहितस्य त्यागः

त्यागस्यैवापरं विलोभनीयं रूपं वर्तते समष्टिहितार्थं वैयक्तिकसुखस्य त्यागः। कालिदासेन चित्रितो विरहकातरोऽपि दुष्यन्तो न राजकर्तव्यं विस्मरति। "राज्ञां तु चरितार्थता दुःखोत्तरैव"[9] अथवा "राज्यं स्वहस्तधृतदण्ड–मिवातपत्रम्"[10] इत्येतादृशानि तस्य वाक्यानि तदेव सूचयन्ति। राज्यं नाम दायित्वनिर्वहणमेव, न विभवभोगः इति कालिदासस्य दृढा धारणा। एतदपि त्यागस्यैव विशिष्टं रूपम्। (Meta-Ethics)

तपोवनम् –

एतत्तु सर्वविदितमेव यद्दुष्यन्तस्य चरित्रं कालिदासेन परिवर्तितमुन्नीतं चेति। केवलं नायकस्य धीरोदात्तत्वं रक्षितुं न तेनेत्थं कृतमिति चिन्तये। कालिदासो नाट्यतन्त्र विज्ञः न तेन भरतोक्तं तन्त्रं कदाप्युल्लङ्घितम्, तथापि

प्रतिपादयितुमीहे यन्नूतन एव कश्चित्प्रयोगस्तेन कृतः शाकुन्तले, यस्य मूले त्यागस्तपोवनं चेति तस्याभीष्टं द्वयं कार्यरतं पश्यन्तु ।

यः कालिदासः प्रथमवयसि प्रणीते नाटकेऽपि साभिमानं वदति – 'न चापि काव्यं नवमित्यवद्यं',[11] स एव प्रगल्भप्रतिभायां दशायां लिखति, 'आपरितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम् ।[12] किमर्थं तस्य "आत्मन्यप्रत्ययं चेतः? निश्चितरूपेण नूतनं किमपि तेन प्रयुक्तमिति द्योत्यते । तदेव विमृशामः ।

शाकुन्तलमिति शृङ्गाररसप्रधानं नाटकम् । शृङ्गारभावः प्रायः प्रमदवनोपवनादिषु स्थलेषु पुष्णाति । किन्तु अभिज्ञानशाकुन्तलमित्येकमेवाद्वितीयं नाटकं यत्र सप्तसु अङ्केषु पञ्च अङ्काः तपोवनभूमौ स्थानं लभन्ते । प्रथमम् अङ्कचतुष्टयं कण्वाश्रमे, अन्तिमश्चाङ्को मारीचाश्रमे । अन्यच्च, तपोवनविरोधिनः प्रणयभावस्योद्भवोऽपि तपोवने, पुनर्मिलनमपि तपोवने एव!– अद्भुतहास्यादिरसाः शृङ्गारसहायका इति प्रसिद्धम् – अत्र तु प्रथमे एवाङ्के दुष्यन्तो वदति – "शान्तमिदमाश्रमपदम्!"[13] – यथा नाम वस्त्रेषु पुष्पसदृशी तन्तुरचना (Embroidery). शोभा वर्धयति तथा शान्तरसरूपिणि वसने शृङ्गाररसस्य शोभाजनयित्री आकृतिरत्रानुभूयते – तथापि तत्र "शृङ्गार एव अङ्गी रसः" इति ब्रूयते । – कालिदासस्य सुयशोऽपि प्रामुख्येन "शृङ्गारे ललितोद्गारे"[14] इति सार्वत्रिकी धारणा । परन्तु रसराजोऽपि शृङ्गारो न प्रभञ्जनवदुत्पातकारी भूयादपि तु मन्दमधुरसमीरलहरीवदाह्लादको भवत्विति कालिदासस्य चिन्तनमत्र स्फुटीभवति ।

न शाकुन्तले विटचेटादिका न वा कोऽपि नर्मसचिवः । न नायिका शृङ्गारकलाकोविदा न वा तस्याः कृत्रिमविलासाः । तस्याः सखीद्वयमपि मुग्धं, न मदनचेष्टितस्येङ्गितमपि परिचिनोति । नायिकाऽपि वल्कलधारिणी न स्वर्णीरणमण्डिता । केवलमेकवारं सा क्षौमं भूषणानि च धारयति, तदपि सर्वं तपोवनप्रसादादेव संप्राप्तम् । तपोवनस्य सात्विकता सर्वत्र राजवैभवमतिशेते । फलाशाप्राप्तिसमयेऽपि नायिका 'वसने परिधूसरे वसाना"[15] एव तिष्ठति । लक्षणीयं यत् 'नियमक्षाममुखी' सा राजविभवयुतस्य नायकस्य चरणवन्द्या[16]

भवति । एष न केवलं मातृत्वस्य गरिमा, तपोवनस्यापि । यथा त्याग–तितिक्षे, तथैव तपोवनमपि कालिदासस्याभीप्सितं वस्तुतत्त्वम् । तत्र तस्यान्तरिकी निष्ठा । सैव कालिदासस्य सत्याधिष्ठिता नीतिः (Meta-Ethics) इति मन्ये ।

तपोवने वर्धितो बहिरपि सदाचरणं नीतिं च सम्यग् अवगच्छति । 'प्रतिसंहर सायकम्'[17] इति राजानमप्यवरोद्धुं शक्नोति । कालिदासस्य प्रातिभपुत्रः शाङ्गरवो राजसभां गत्वा प्रथमं तु विनम्रमाचरति, किन्तु यदा राजा शकुन्तलां स्वीकर्तुं नेच्छति तदा स तेजस्वी ब्रह्मचारी " किं कृतकार्यद्वेषो? धर्मं प्रति विमुखता?"[18] इति सरोषं गर्जितुमपि न सङ्कोचमनुभवति । "ऐश्वर्यमत्त" इति तमाधिक्षिपति – तदपि साक्षात् राजसभायाम् ! ईदृशी तेजस्विता केवलं तपोवनपरिपोषितेन निर्दोषधर्माचरणेन वावाप्यते इति कालिदासस्य नीतिमूल्याधिष्ठितं चिन्तनम् ।

कालिदासस्य मते तपोवनानि नाम निर्लोभितायाः, तेजस्वितायाः, अनुशासनस्य च आकरस्थानानि । अत एव निर्लोभिताविषये वरतन्तुशिष्यः कौत्सः, तेजस्वितासन्दर्भे शाङ्गरवः, अनुशासने च मुनिर्वाल्मीकिः (यः सीतात्यागप्रसङ्गे "अस्त्येव मन्युर्भरताग्रजे मे"[19] इति साटोपमुद्गिरति) इत्यादीनि पात्राणि तेन चित्रितानि । संयमतपोधनेषु मुनिषु कालिदासस्य महती श्रद्धा दृश्यते । किं बहुना? स एव तस्य चिन्तनाधार इति वचने न काऽप्यातिशयोक्तिरिति मन्ये ।

अतिथिसत्कार :

'अतिथिदेवो भव' इत्युपनिषद्वचने कालिदासस्य दृढमूला श्रद्धा प्रतीयते । तपोवनेषु अतिथिसत्कारः प्राथम्येनाचर्यते स्म । अत्र लक्षणीयं यत्सोमतीर्थं गच्छन् कण्वमुनिः शकुन्तलामतिथिसत्काराय नियोज्यैव गच्छति ।[20] शकुन्तलाया जीवने यः शोकात्मकः कालखण्डः तस्यापि मूलातिथिसत्कार–च्युतिरूपी प्रमाद इति कालिदासः सङ्केतयतीति भाति । ननु नीतिचिन्तनस्थैव (Applied-Ethics) अयं चेतोहारी आविष्कार इति मन्ये ।

तपस्या –

कालिदासस्य यथा त्याग–तपोवनविषये चिन्तनं तथैव तपस्याविषयेऽपि दृश्यते। तपोबलं कामबलात्समर्थतरम् इति कुमारसम्भवे स्पष्टतया संसूच्यते। यदि "तथाविधं प्रेम, पतिश्च तादृशः"[21] इति द्वयं प्राप्तव्यं, तर्हि न रूपसंपत् पर्याप्ता, अपि तु तपोबलमेवैकमात्रः सदुपाय इति प्रभावितया वर्णितं महाकविना।

कालिदासस्य जीवनदर्शनदृष्ट्या त्याग–तपस्या–तपोवनानामित्थं महत्त्वपूर्णं स्थानम्। 'कर्तव्यनिष्ठा' इति तदधिष्ठिता कालिदासस्याभीप्सिता धारणा। सापि कर्तव्यनिष्ठा स्वदेश–स्वसंस्कृतिहितार्थमेव भवत्विति तस्य चिन्तनम्। पश्यन्तु। पूर्वकवयो भासादयस्तु स्वीयकृतीनां भरतवाक्येषु "एकातपत्रां महीं राजा प्रशास्तु"[22] इति प्रकटयन्ति स्म, तदा कविकुलगुरोः कालिदासस्य वचांसि लक्षणीयानि। स वदति– 'प्रवर्ततां प्रकृतिहिताय पार्थिवः'[23] इति।

अन्ते, कविकुलगुरोर्नीतिचिन्तनं मनसि निधाय तस्यैव शब्दैरिमं वाग्विस्तरं समापयामि, यत् 'सरस्वती श्रुतिमहती महीयताम्'

इति शम्।

– सन्दर्भसूची –

1. भरतचरितम्
2. रघु. 1–7
3. रघु. 1–18
4. रघु. 5–16
5. रघु. 8–3
6. रघु. 5–31
7. रघु. 12–7
8. रघु. 12–13
9. शाकुन्तलम् 5–6
10. शाकुन्तलम् 5–6
11. मालविकाग्निमित्रम् 1–2

12. शाकुन्तलम् 1–2
13. शाकुन्तलम् 1–15
14. वसने परिधूसरे वसाना, नियमक्षाममुखी धृतैकवेणिः। (शाकुन्तलम् 7–21)
15. शाकुन्तलम् 7–24
16. तत्रैव 1–11
17. शाकुन्तलम् 5–17
18. रघुवंशम् 14–73
19. इदानीमेव दुहितरं शकुन्तलामतिथिसत्कारय संदिश्य दैवमस्याः प्रतिकूलं शमयितुं सोमतीर्थं गतः। (शाकु.1)
20. कुमारसंभवम् – 5–2
21. महीमेकातपत्राङ्कनं राजसिंहः प्रशास्तु नः। (स्वप्नवासवदत्तम्–भरतवाक्यम्) इमामपि महीं कृत्स्नां राजसिंहः प्रशास्तु नः। (प्रतिज्ञा, अविमारकम्, अभिषेक, पञ्चरात्रम् – भरतवाक्यम्)
22. तथा लक्ष्म्या समायुक्ते राजा भूमिं प्रशास्तु नः। (प्रतिमानाटकम्–भरतवाक्यम्)
23. अभिज्ञानशाकुन्तले भरतवाक्यम्

सन्दर्भग्रन्थसूची

1)	कुमारसंभवम्	डॉ. गौतम पटेल	डॉ. गौतम पटेल, अहमदाबाद
2)	रघुवंश	श्री. रा.ग. बोरवणकर	चित्रशाळा प्रेस, पुणे, सन 1934
3)	कालिदास ग्रन्थावली	पं. रेवाप्रसाद द्विवेदी	काशी हिन्दू विश्वविद्यालय, वाराणसी, सन 1986
4)	Kalidasa	Prof. G.C. Jhala	Sanskrit Sewa Samiti, Ahmedabad सन 1983
5)	Works of Kalidasa	H.H.Wilson	Bharaliya Publishing House, Delhi, सन 1979
6)	अभिज्ञानशाकुन्तलम्	एम.आर. काळे	मोतीलाल बनारसीदास दिल्ली. सन 1994
7)	भासनाटकचक्रम्		

LIST OF CONTRIBUTORS

Dr. Uma Vaidya
Vice Chancellor,
Kavikulaguru Kalidas Sanskrit University, Ramtek

Dr. Madhusudan Penna
Associate Professor,
Department of Bharatiya Darshan,
Kavikulaguru Kalidas Sanskrit University, Ramtek

Dr. Nanda Puri
Associate Professor,
Department of Sanskrit Sahitya,
Kavikulaguru Kalidas Sanskrit University, Ramtek

Dr. C. G. Vijaykumar
Associate Professor,
Department of Vyakaran,
Kavikulaguru Kalidas Sanskrit University, Ramtek

Dr. Krishnakumar Pandey
Associate Professor,
Department of Vedang Jyotish
Kavikulaguru Kalidas Sanskrit University, Ramtek

Dr. Hrishikesh Dalai
Assistant Professor,
Department of Education,
Kavikulaguru Kalidas Sanskrit University, Ramtek

Dr. Smita Hotey
Associate Professor,
L.A.D. College, Nagpur

Dr. Parineeta Deshpande
Director, Kane Research Centre,
Asiatic Society of Mumbai, Mumbai

Dr. Manjusha Gokhale
Ex-Head, Department of Sanskrit,
Ruiya College, Mumbai

Dr. Leena Rastogi
President, Sanskrit Bhasha Pracharini Sabha,
Civil Lines, Nagpur

Guidelines for Authors

Shodhsamhita Journal of Fundamental & Comparative Research being published by Kavikulaguru Kalidas Sanskrit University, Ramtek publishes original articles related to any aspect of Indian Culture, Philosophy, Literature, Ancient Indian Sciences, Yoga, Tantra, Psychology and other subjects. It encourages comparative and interdisciplinary research.

1) The article must be an original contribution and should not have appeared or been accepted in any other Publication
2) The article should be submitted in Sanskrit or English languages.
3) Article should be submitted on A4 size paper using MS Word, Times New Roman font in12 pt. for English and Arjun font in 16 pt for Sanskrit.
4) 1.25" margin on both sides & total words should not exceed above 3000 words.
5) Along with article it is essential to send abstract in 300 words.
6) Author should adopt APA style manual for citation & references.
7) Please mention author (s) name, institute name, designation-mail & mobile number along with the paper.
8) The articles will be selected by the scrutiny committee as well as peer team. Selected articles will be published in the "SHODHASAMHITA" with ISSN Number.
9) The article is to be submitted in hard & soft copy with membership fee. The soft copy is to be sent on e-mail: kksushodh@gmail.com
10) Importance will be given to articles with original research in the subject.
11) The author should specify that the article is his/her own research and has not been copied or imitated on others.
12) The author will be informed within a period of three months whether the article is accepted for publication. No correspondence should be made by the authors.
13) The decision of the peer-committee shall be final.
14) Subscription for the journal does not entitle the publication of the article.
15) The author of article will get a copy of the journal in which the article is published.
16) Donation towards offprints of the published article is Rs. 300/- in addition to the membership-fees
17) **MEMBERSHIP FEES (Per Year)**
    1) Institutional – Rs. 500/- 2) Individual- Rs. 300/- 3) For Students– Rs. 200/-
18) The amount should be paid in Cash, Cheque or by D.D. of Bank of Maharashtra drawn in favour of Registrar, KKSU, Ramtek.

Copyright :
The copyright of the articles published in the Journal rests with the Kavikulaguru Kalidas Sanskrit University, Ramtek.

KAVIKULAGURU KALIDAS SANSKRIT UNIVERSITY, RAMTEK

Administrative Building, Mouda Road,
Ramtek, Dist. Nagpur (Maharashtra) India.
Email - unikalidas@yahoo.com www.sanskrituni.net.in